B.A. Sanskrit
Year – I
Semester – I
Paper - IV

# Raghuvamsa 4th Canto
# रघुवंशे चतुर्थः सर्गः

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr.G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr.B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr.Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr.Shubh Chandra Jha
Dr. Mayank Pandey

© SCSVMV Deemed University, June 2024

All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre

Further information on the SCSVMV ODL Programmes may be obtained from

**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
Enathur,Kanchipuram-631561.
TamilNadu, India
Phone: 044 – 27264301; Mail Id: onlineprograms@kanchiuniv.ac.in ;

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा(NAAC) 'A'श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor
Sri ChandrasekharendraSaraswati Viswa Mahavidyalaya
Enathur, Kanchipuram

# रघुवंशमहाकाव्यम्
## (चतुर्थः सर्गः)

**पाठ्यपरिचयः**

पत्रमिदं कविकुलगुरोः कालिदासस्य कृतिं छात्रेभ्यो परिचाययति। महाकव्यप्रपञ्चः सकलवाङ्मयमौलिभूतः इति सर्वविदितोऽयं विषयः। तत्रापि अतिविशिष्टा कालिदासकृतिः। तत्र रघुवंशमहाकाव्यं लघुद्वयीति प्रथिते ग्रन्थद्वये अन्यतरत्। इदञ्च काव्यं स्नातककक्ष्यायां महाकाव्यशैलीं बोधयित्वा पौराणिकीं कथामपि परिचाययति। रघोः गुणाः निर्वहणशक्तिः तथा पराक्रमश्चेति इमे विषयाः नायकस्य सर्वोत्कर्षं तथा कवेः काव्यचातुरीञ्च व्यञ्जयन्ति।

**प्रथमः खण्डः – कविपरिचयः, काव्यपरिचयः, रघोः राज्यप्राप्तिः**

अस्मिन् खण्डे कालिदासस्य परिचयः रघुवंशमहाकाव्यस्य परिचयः तथा चतुर्थसर्गस्य अष्टौ श्लोकाश्च विमृष्टाः। कालिदासस्य देशकालकृतिपरिचयः रघुवंशमहाकाव्यस्य सर्गाणां सङ्क्षेपः तथा अष्टानां श्लोकानां विवरणमत्र विहितम्। रघोः राज्यप्राप्तिः, शत्रूणाम् भीतिः, प्रजानाम् मोदः, राज्यशासनम्, वैदुष्यम्, एकचक्रवर्तित्वम् इत्येते विषयाः वर्णिताः।

**द्वितीयः खण्डः - रघोर्यशः**

अस्मिन् खण्डे रघोः पूर्वपुरुषापेक्षया प्रजापालनम्, नयवेदित्वम्, भूतानाम् उत्कर्षः, राजपदसार्थक्यम्, शास्त्रचक्षुस्मत्त्वम्, यशोव्याप्तिः, जैत्रयात्रायै धनुर्धारणम्, शरदृतुप्राप्तिः, यशोविस्तारः, यात्रायाः नीराजनम्, प्रजानां नीराजनम् इत्येते विषयाः वर्णिताः

**तृतीयः खण्डः – रघोः जैत्रयात्रारम्भः**

अस्मिन् खण्डे रघोः जैत्रयात्रारम्भः, सेनाप्रस्थानम्, सेनायाः चतुस्स्कन्धत्वम्, अटवीनां विच्छेदः, नायकत्वेन सेनानयनम्, मार्गस्य उल्बणीकरणम्, सुह्मानां जयः, वङ्गानां जयः, तेषाम् उत्खातप्रतिरोपणम्,

कलिङ्गाभिमुखगमनम्, महेन्द्रजयः, कलिङ्गजयः, दक्षिणाशागमनम्, कावेरीप्राप्तिः, मलयाद्रिप्राप्तिः, पाण्ड्यानां जयः इत्येते विषयाः वर्णिताः।

**चतुर्थः खण्डः – रघोः दक्षिणपश्चिमजैत्रयात्रा**

अस्मिन् खण्डे रघोः ताम्रपर्ण्यां मुक्तप्राप्तिः, मलयदर्दुरप्राप्तिः, सह्यपर्वतलङ्घनम्, केरलजयः, मुरलालङ्घनम्, युद्धम्, अपरान्तदेशप्राप्तिः, त्रिकूटपर्वतप्राप्तिः, पारसीकं प्रति प्रस्थानम्, यवनानां जयः, यवनसेनानाशः इत्येते विषयाः वर्णिताः

**पञ्चमः खण्डः – रघोः उत्तदिग्यात्रा**

अस्मिन् खण्डे रघोः उत्तरदिशि जैत्रयात्रा, सिन्धुतीरे पराक्रमः, काम्बोजजयः, कैलासगमनम्, गङ्गाप्राप्तिः, पार्वतीयानां जयः, तुहिनाद्रिगमनम्, कामरूपजयः, विश्वजिद्यज्ञारम्भः इत्येते विषयाः सकौशलं वर्णिताः।

महाकाव्यस्य शैलीं बोधयन्, रघोः गुणगणान् वर्णयन्, शब्दधातुज्ञानं प्रापयन् काव्यखण्डोऽयं छात्रेभ्यः निधिमिव प्रयच्छति। विविधशब्दजालमण्डितोऽयं काव्यखण्डः सर्वाङ्गीणतया भाषावैदुष्यं व्युत्पादयति।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| **प्रथमः** | **परिचयः** | 1-15 |
| | कविपरिचयः | |
| | काव्यपरिचयः | |
| | रघोः राज्यप्राप्तिः | |
| **द्वितीयः** | **रघोर्यशः** | 16-29 |
| | रघोःराज्यप्राप्तिः | |
| | प्रजाभिरञ्जनम् | |
| | राज्यनिर्वहणम् | |
| | यशोविस्तारः | |
| **तृतीयः** | **रघोः जैत्रयात्रारम्भः** | 30-43 |
| | जैत्रयात्रारम्भः, सेनाप्रस्थानम्, सेनायाः चतुस्स्कन्धत्वम् | |
| | अटवीनां विच्छेदः, नायकत्वेन सेनानयनम्, मार्गस्य उल्बणीकरणम् | |
| | सुह्मानां जयः, वङ्गानां जयः, तेषाम् उत्खातप्रतिरोपणम् | |
| | कलिङ्गाभिमुखगमनम्, महेन्द्रजयः, कलिङ्गजयः | |
| चतुर्थः | **रघोः दक्षिणपश्चिमजैत्रयात्रा** | 44-57 |
| | रघोः ताम्रपर्ण्यां मुक्तप्राप्तिः, मलयदर्दुरप्राप्तिः, सह्यपर्वतलङ्घनम् | |
| | केरलजयः, मुरलालङ्घनम्, युद्धम्, अपरान्तदेशप्राप्तिः, त्रिकूटपर्वतप्राप्तिः | |

| | | |
|---|---|---|
| | पारसीकं प्रति प्रस्थानम्, यवनानां जयः, यवनसेनानाशः | |
| पञ्चमः | **रघोः उत्तदिग्यात्रा** | 58-74 |
| | उत्तरदिशि जैत्रयात्रा, सिन्धुतीरे पराक्रमः, काम्बोजजयः | |
| | कैलासगमनम्, गङ्गाप्राप्तिः, पार्वतीयानां जयः | |
| | तुहिनाद्रिगमनम्, कामरूपजयः, विश्वजिद्यज्ञारम्भः | |

## प्रथमः खण्डः – कविपरिचयः, काव्यपरिचयः, रघोः राज्यप्राप्तिः

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. चतुर्थसर्गस्य सारांशः
4. चतुर्थसर्गस्य प्रथमश्लोकादारभ्य अष्टाविंशतिश्लोकपर्यन्तभागः (श्लोकः, पदच्छेदः, अन्वयः, तात्पर्यम्)
5. बोधप्रश्नाः
6. शब्दावली
7. सारांशः
8. अभ्यासप्रश्नाः
9. संदर्भग्रन्थसूची
10. सहायकग्रन्थसूची

### प्रस्तावना

रघुवंशम् एकं महाकाव्यम् अस्ति।यस्मिन् एकोनविंशतिसर्गास्सन्ति।अयं ग्रन्थः काव्यस्य दर्शनस्य च सुन्दरं समन्वयं प्रस्तौति ।वीररसप्रधानम् इदं काव्यम्।अस्मिन् पाठ्यांशेरघुवंशमहाकाव्यस्य चतुर्थः सर्गः निर्धारितः। रघुवंशमहाकाव्यस्य चतुर्थः सर्गः भाषादृष्ट्या व्युत्पादक: शब्दसंवर्धकश्चास्ति।गुरुणा दत्तं राज्यमवाप्य रघोः ऐश्वर्यं कीदृशमासीदिति अस्मिन् पाठ्यांशे अस्माभिः पठ्यते।

**उद्देश्यम्**

१. महाकाव्यशैलीज्ञानम्

२. रघोः गुणानां ज्ञानम्

३. कालिदासस्य काव्यशैलीज्ञानम्

४. नूतनानां शब्दानां ज्ञानम्

५. वाक्यरचनाकौशलसंपादनम्

६. पौराणिकेतिहासस्य ज्ञानम्

**चतुर्थसर्गस्य सारांशः**-सूर्यवंशोद्भूतेन राज्ञा दिलीपपुत्रेण रघुना राज्यारोहणं कृत्वा तादृशं शासनं चकार येन "राजा" इति शब्द: सार्थक: जातः।महाकविना कालिदासेनरघुवंशमहाकाव्यस्य चतुर्थे सर्गे राज्याधिरोहणस्य दिग्विजयस्य च विस्तृतं विवरणं कृतम्।

**कालिदासस्य परिचयः**

कालिदासः महाकविः वर्तते। सः कविकुलगुरुः इति प्रसिद्धः। ऐतिह्यानुसारं सः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत्। तस्य नाम काल्या: दास: इति समासात् व्युत्पद्यते।

कालिदासः रघुवंशं, कुमारसंभवं, मेघदूतम् खण्डकाव्यं च इति त्रीणि श्रव्यकाव्यानि रचितवान् । अभिज्ञानशकुन्तला, विक्रमोर्वशियां, मालविकाग्निमित्रं च इति त्रीणि दृश्यकाव्यानि अपि निर्मितवान् । केचन जनाः मन्यन्ते यत् सः ऋतुसंहारः इति काव्यं श्यामलाष्टकादीनि काव्यानि अपि रचितवान् । केचन जनाः कालिदासत्रित्वस्य विषये अपि वदन्ति ।

**कालिदासस्य जीवनम्**

कालिदासो हि परम्परासमर्थको भारतीय आसीद्,यो हि सनातने धर्मे मनागपि परिवर्तनं वोपेक्षणं नैव सहते। तेनैव सोऽभिज्ञानशाकुन्तलस्य मङ्गलाचरणपद्ये बौद्धसम्मतनिरीश्वरवादनिरासाय 'प्रत्यक्षाभिः प्रपन्नस्तनूभिः' इति कथयति ।स तु देवत्रयस्यैकान्तैक्यं समर्थयति । यथा मङ्गलपद्ये शिवः कुमारसम्भवे (२ सर्गे ) ब्रह्मा, रघुवंशे (१० सर्गे), विष्णुश्च स्तुताः सन्ति । प्रत्यभिज्ञावादी स साङ्ख्ययोगावपि तथैवाद्रियते । वेदेषु परमश्रद्धा, पुनर्जन्मवादः, ईश्वरस्य जगत्प्रणेतृत्वञ्च कालिदासस्य जीवनदर्शनस्य केचित्पक्षाः ।

**कवेः देशः**

कालिदासस्य जीवनवृत्तिविषये बहुविधाः लोकविश्रुतयः अनेके वादाः अपि सन्ति । केचित् एनं विक्रमादित्यस्य सभायां कविः इति आमनन्ति । केचित् गुप्तकालीननरेशाणाम् आश्रयं प्राप्तवानिति कथयन्ति । धारानगरे भोजराजस्य सभायां कविरत्नपदभूषितः अभूत् इति कथाकोविदाः वदन्ति। ऐतिह्यानुसारं बाल्यकाले सः अतीव मूर्खः अवर्तत । विद्याधरया सह तस्य विवाहः अभवत् ।ततः कालिदासः कालीदेव्याः वरप्रसादेन विद्वान् अभवत् इति । इयं कथा कालिदासस्य प्रतिभया कविताचातुर्येण अपि जाता तथ्या तु न इति विदुषां मतिः ।

मेघदूते अन्यासु कृतिषु सः पुनःपुनः उज्जयिन्याः सौन्दर्यं वर्णितवान् अतः सः तत्रैव बहुकालम् उषितवान् स्यात् । काश्मीरे प्रवर्धमानस्य केसरपुष्पं सः केवलं वर्णितवान् इत्यतः काश्मीरीयः स्यादिति केषाञ्चित् अभिप्रायः । तेन मेघदूते निर्दिष्टः रामगिरिः विदर्भे भवति । रघुवंशमहाकाव्ये तेन वर्णितं रघोः दिग्विजयं सूक्ष्मतया परिशीलयामश्चेत् भारते तस्य अपरिचितः प्रदेशः नास्तीति स्पष्टं ज्ञायते । यथा असमप्रदेशम् अवर्णयत् तथैव मनोहरशैल्या केरलमपि अवर्णयत् । हिमालयमिव समुद्रतीरमपि सुन्दरम् अवर्णयत् । अतः सः राष्ट्रकविः, उज्जयिनी तस्य स्थिरस्थानम्, समग्रभारतं तस्य चरस्थानम्, अतः समग्रभारतमेव तस्य प्रदेशः इत्यपि वक्तुं शक्यते ।

**कालः**

आभारतीया भारतीया वा कविवरमिमं नवीनतमं प्राचीनतमं वा कल्पयन्तु नाम, किन्तु अस्य कृतिभिः एतस्य स्थायि यशः न मनागपि ह्वीयते। अस्य कालविषये तु प्राधान्येन।

१ तत्र प्रथमं क्रिस्ताब्दतः पूर्वं प्रथमशताब्द्याम्।

२. द्वितीयं क्रिस्ताब्दतः पश्चात् पञ्चमशताब्द्याम्।

३ तृतीयं क्रिस्ताब्दतः पश्चात् षष्ठशताब्द्याम्।

तृतीयस्य प्रवर्तकः फर्गुसनमहोदयः आसीत्। एतस्य कथनम् भवति यत् ५४४ क्रिस्ताब्दे विक्रमादित्यपदलाञ्छनेन केनापि राज्ञा हूणाः विजिता। मतमिदं मैक्समुलरः अपि स्वीकरोति । डा. हार्नलीमहोदयः कथयति यत् महाकवेः कालिदासस्य आश्रयदाता यशोधर्मानृपतिः षष्ठ शताब्द्याम् आसीत्। अनेन कविना तस्य यात्रावर्णनव्याजेन रघोः दिग्विजययात्रा वर्णिता इति।

कालिदासो हि रघुवंशे षष्ठसर्गे इन्दुमतीस्वयंवरप्रसङ्गे राजवर्णनक्रमे प्रथमं मगधेश्वरमेव गृह्णाति वर्णयति अपि तदुत्कर्षं यथा स मागध एव स्यात्, किन्तु तत्सम्मतः परन्तपो नाम मागधो राजा न कुत्रापि पुराणेष्वपि श्रुयते। रघुवंशे एवं चतुर्थसर्गे मगधं वा पुष्पपुरं पुनर्नामतोऽपि न स्मरति। स हि मालविकाग्निमित्रे विदर्भान् हि दशार्णानामधीनस्थराज्यत्वेन वर्णयति यत्र हि यज्ञसेनमाधवसेनयोः द्वैराज्यं स्थापितमस्ति। रघुवंशे तु 'सौराष्ट्ररम्यानपरो विदर्भान्' इति पृथगेव स्वतन्त्रराज्यरूपेण स विदर्भान् स्मरति। अपरञ्च, अग्निमित्रसमये साकेतप्रदेशो मगधानामन्तर्वर्तिप्रदेश आसीत्। रघुवंशे तु स साम्राज्यकेन्द्रत्वेन वर्णितोऽस्ति। तेन हि रघुवंशस्य प्रणेता कालिदासोऽग्निमित्रसमकालिक इति नैव सर्वतोभावेन सङ्गच्छते।

रससिद्धस्य अस्य कवीश्वरस्य महिमा तदीयकाव्यैः एव ज्ञायते । तस्य काव्यस्य परिशीलनेन वेदशास्त्रपुराणेषु तस्य अगाधं पाण्डित्यम् आसीत् इति ज्ञायते । कल्पनाचातुर्यं पदानां माधुर्यं, पात्रसंविधाननैपुण्यं, रसोल्लासः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैः अस्य कवेः काव्यानि सर्वजनादरणीयानि । कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः पुरस्कृतः । अस्य रचनाः

चतुर्वर्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तःकरणैः संख्यावद्भिः । अयं महाकविः वैदर्भीरीतेः सम्राट्, प्रसादगुणपरिपूर्णैः, अनुपमोपमाप्रयोगप्रजापतिः प्रकृतिचित्रणचित्रकारः, व्यञ्जनाव्यञ्जितशास्त्रकलेवरः, अभिनवकल्पनाकुशलः, अन्यतमः काव्यशिल्पी विराजते - सभाभास्वरो भास्करः, वाणीवरदवत्सः, भूमातुर्मौलिमुकुटहीरकः, धन्योऽयं कविमूर्धन्यः, स्वकीयकुलकेतनः, सर्वतन्त्रस्वतन्त्रः, सकलशास्त्रासारनिश्यन्दः, काव्यकोशविकासविभाकरः, वैदर्भीरीतिसभाजनसभ्यः, प्रसादगुणालम्बनः, उपमासीमन्तिनी-सीमन्तसिन्धूरदानसरसः, कविताकामिनीविलासः, काव्यरचनाविक्रमादित्यः, श्रीविक्रमादित्य कविकादम्बकदम्बसमाराधितपादपद्मः, मुकुटालङ्करणारहितोऽपि सार्वभौमः, कविकुलगुरुः, कविचक्रवर्ती, प्रकृतिनटीनिर्वचनचतुरः विद्योत्तमाद्योतितान्तःकरणः, समर्चितकालिकाचरणः, व्यासवाल्मीकिप्रभृतीनाम् अवरजः, विश्वविश्रुतकीर्तिः आसीत् महाकविः कालिदासो नाम ।

<u>रघुवंशमहाकाव्यपरिचयः</u>

रघुवंशमहाकाव्यं कालिदासेन विरचितं प्रसिद्धं महाकाव्यम् भवति। तत् एकोनविंशतिसर्गैः युतं लालित्यपूर्णं महाकाव्यम्। रघुवंशस्य कथावस्तु सूर्यवंशस्य राज्ञां वर्णनाधारितम् विद्यते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता विद्यते। तदुत्तरं रामवंश्यानां तत्तन्नृपाणां चरितानि उपन्यस्तानि। चरमः सर्गः अग्निवर्णस्य गर्भवत्याः महाराज्ञ्याः शासनाचरणेन समं समाप्यते। कालिदासः अग्निवर्णपरवर्तिनां राज्ञाम् अपि वर्णनं चिकीर्षति स्म, परम् असौ कालेन कवलीकृतः इति किंवदन्ती। तथा अपि कालिदासेन परतः अपि रघुवंशस्य सर्गाः लिखिताः; परन्तु ते न प्राप्यन्ते इत्यपि प्रसिद्धिः। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः साकं भेदः आपतति, परन्तु वायुपुराण-वर्णितानुसारं रामवंशावल्या साकं रघुवंशवर्णित-वंशावली भूयसा सामञ्जस्यं धारयति।

रघुवंशं सूर्यकुलोत्पन्नानां भूपतीनां चरितकथनात्मकं वर्तते। दिलीपपुत्रस्य रघोर्नाम्ना सकल एव सूर्यवंशो रघुवंश इति ख्यातिं गतः। सूर्यवंशस्य रघुनाम्ना प्रसिद्धेः कारणं महाकविकालिदासः वर्णयति यत्,

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः।

वंशस्य कर्त्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे।। इति।

महाकाव्यस्य लक्षणानुसारं यानि लक्षणानि आवश्यकतानि, तानि रघुवंशे दरीदृश्यन्ते। महाकाव्यस्य लक्षणानुसारम् अस्मिन् रघुवंशे एककुलोत्पनाः बहवः पृथ्वीपालाः वर्णिताः। अस्मिन् अङ्गी वीरो रसः। श्रृङ्गार-करुण-शान्तादयः रसाः, नाटकस्य सन्धयः अपि अङ्गानि यथास्थाने विहिताः। इदं अपि रामायणादिरूपाम् इतिहासकथाम् आश्रित्य प्रणीतम्। अत्र परमानन्ददायकाः धर्मार्थकामोक्षरूपाश्चत्वारो वर्गाः विहिताः। प्रारम्भेऽस्मिन् पार्वती-परमेश्वरयोः नमस्कारात्मकं मङ्गलाचरम् विद्यते। सर्गाणाम् आदिमध्येषु एकविधम् अन्तेषु अन्यविधं वृत्तम् विद्यते। नातिस्वल्पाः नातिदीर्घाश्चात्र ऊनविंशतिः सर्गाः। नवमसर्गे चान्यत्र क्वचित् क्वचित् नानावृत्तमयानि अपि पद्यानि सन्ति, प्रत्येकं सर्गान्ते भाविसर्गकथा सङ्केतिता। महाकाव्ये कथनीयाश्च सन्ध्यासूर्येन्दुरात्रिप्रदोषादयः सर्व एव विषयाः यथास्थानां वर्णिताः।

भारतीयैः, पाश्चात्यैः अपि विद्वद्भिः कृताः रघुवंशस्य अनेकाः टीकाः समुपलभ्यन्ते। तासु मल्लिनाथसूरेः टीका प्रसिद्धा। तस्याः नाम सञ्जीवनी-टीका इति। हिन्दीभाषायाम् अपि रघुवंशस्य टीका वर्तते, यस्याः नाम भावर्थदीपिकाभाषाटीका इति। अस्याः हिन्दीटीकाकारः पण्डितज्वालाप्रसादमिश्रः वर्तते। हिन्द्यां रघुवंशस्य मणिप्रभाटीका अपि वर्तते, यस्याः टीकाकारः श्रीहरगोविन्दमिश्रः।

अथ प्राप्तराज्यस्य रघोः कीदृशीशोभा आसीदिति तामेवाह-

**१.स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।**

**दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ ४-१ ॥**

**पदच्छेद:**

स:, राज्यम्, गुरुणा, दत्तम् प्रतिपद्य, अधिकम्, बभौ, दिनान्ते, निहितम्, तेजः,सवित्रा, इव, हुताशनः।

**अन्वयः**

स: गुरुणा दत्तं राज्यं प्रतिपद्य दिनान्ते सवित्रा निहितं तेजः (प्रतिपद्य) हुताशनः इव अधिकं बभौ।

**तात्पर्यम्**

आत्मीयेन पितृचरणेन दिलीपेनसमर्पितं गुरुणा प्रापितं च राज्यंसंप्राप्यधर्मप्राणस्य रघोःतादृशी शोभा जाता यथादिवसान्तेसूर्यास्तवेलायां अग्नेः प्रकाशस्य।

अथ रघो राज्येऽवस्थानं श्रुत्वा शत्रूणां हृदि सन्तापाधिक्यं बभूवेत्याह-

**२.दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।**
**पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ ४-२॥**

**पदच्छेद:**

दिलीपानन्तरम्, राज्ये, तम्,निशम्य, प्रतिष्ठितम् , पूर्वं, प्रधूमितो, राज्ञाम्, हृदये,अग्नि इव उत्थितः।

**अन्वयः**

दिलीपानन्तरं राज्ये तं प्रतिष्ठितं निशम्य पूर्वं राज्ञां हृदये प्रधूमितः अग्निः उत्थितः इव। (अभूत्)।

**तात्पर्यम्**

राज्ञः दिलीपस्य शासने ये विरोधिनः राजानः आसन् , तेषां हृदये वर्तमानः धूमयुक्तः स्वल्पसन्तापाग्निःरघोः राज्यप्राप्त्यनन्तरंमहाग्निजातः।

अथ रघुं राज्ये अवस्थितं दृष्ट्वा सर्वा अपि प्रजाः प्रसन्ना बभूवुरित्याह-

**३.पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।**

**नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ४-३॥**

**पदच्छेदः**

पुरुहूत-ध्वजस्य,इव, तस्य, उन्नयन-पङ्क्तयः, नव-अभ्युत्थान-दर्शिन्यः, ननन्दुः, सप्रजाः, प्रजाः ।

**अन्वयः**

पुरुहूत-ध्वजस्य इव तस्य नव-अभ्युत्थान-दर्शिन्यः उन्नयन-पङ्क्तयः सप्रजाः प्रजाः ननन्दुः।

**तात्पर्यम्**

जनाःदेवेन्द्रपताकाया अभ्युत्थानं विलोक्य यथाआनन्दं प्राप्नुवन्ति तथैवराज्ञः रघोरपि नवीनम् अभ्युदयं दृष्ट्वास्वसन्ततिभिस्साकंविद्यमाना: प्रजाः आनन्दं प्राप्तवन्तः।

अथ रघो: सिंहासनारूढक्षण एव शत्रुमण्डलमपि पदाक्रान्तमभूदित्याह-

**४.सममेव समाक्रान्तं द्वयं द्विरदगामिना ।**

**तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४-४॥**

**पदच्छेदः**

समम्, एव, समाक्रान्तम्, द्वयम्,द्विरद-गामिना ,तेन, सिंहासनम्, पित्र्यम्, अखिलम्, च, अरिमण्डलम्।

**अन्वयः**

द्विरद-गामिना तेन समम् एव द्वयं समाक्रान्तं पित्र्यं सिंहासनम् अखिलम् अरिमण्डलं च ।

**तात्पर्यम्**

गजगामी रघुः पित्र्यं सिंहासनं सम्पूर्णं शत्रुमण्डलंच एकस्मिन्नेव काले समाक्रान्तवान् ।

अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह-

**५.छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।**

**पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ४-५॥**

**पदच्छेदः**

छायामण्डल-लक्ष्येण, तम्, अदृश्या, किल, स्वयम्, पद्मा, पद्मातपत्रेण, भेजे, साम्राज्य-दीक्षितम् ।

**अन्वयः**

पद्मा स्वयम् अदृश्या किल छाया-मण्डल-लक्ष्येण

पद्म-आतपत्रेण साम्राज्य-दीक्षितं तं भेजे ।

**तात्पर्यम्**

राज्याभिषिक्तंतमवलोक्य तस्य तेजोविशेषेण स्वयं सन्निहिता लक्ष्मी कान्तिपुञ्जानुमेयेन कमलच्छत्रेण रघुंसिषेवे।

सम्प्रति सरस्वतीसान्निध्यमाह-

**६.परिकल्पितसान्निध्या काले काले च वन्दिषु।**

**स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ४-६॥**

**पदच्छेदः**

परिकल्पित-सान्निध्या, काले, काले, च, वन्दिषु, स्तुत्यम्, स्तुतिभिः, अर्थ्याभिः, उपतस्थे, सरस्वती।

**अन्वयः**

सरस्वती च काले काले वन्दिषु परिकल्पित-सान्निध्या (सती) स्तुत्यं (तम्)अर्थ्याभिः स्तुतिभिः उपतस्थे।

**तात्पर्यम्**

सरस्वत्यपियोग्यसमयेषु स्तुतिपाठकेषु वर्त्तिनी भूत्वा स्तोतुं योग्यं राजानंरघुं शोभनार्थैः स्तोत्रैः सेवितवती।

अथ रघोरनन्यपूर्वमिव पृथ्वीशासनमासीदित्याह-

**७.मनुप्रभृतिर्मान्यैर्भुक्ता यद्यपि राजभिः ।**

**तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा ॥ ४-७॥**

**पदच्छेदः**

मनुप्रभृतिः,मान्यैः, भुक्ता, यद्यपि, राजभिः, तथापि, अनन्यपूर्वा, इव, तस्मिन्, आसीत्, वसुन्धरा।

**अन्वयः**

मनुप्रभृतिः मान्यैः राजभिः यद्यपि भुक्ता तथापि तस्मिन् अनन्यपूर्वा इव आसीत् ।

**तात्पर्यम्**

पृथिवी वैवस्वतमन्वादिभिः नृपैः यद्यपि उपभुक्तातथापि रघौ सा अभुक्ता इव जाता।

अत्र कारणमाह-

**८.स हि सर्वस्य लोकस्य युक्तदण्डतया मनः।**

**आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ४-८॥**

**पदच्छेदः**

सः, हि, सर्वस्य, लोकस्य ,युक्तदण्डतया, मनः , आददे, न अतिशीतोष्णः, नभस्वान् ,इव, दक्षिणः ।

**अन्वयः**

हि सः युक्तदण्डतया सर्वस्य लोकस्य मनः नातिशीतोष्णः दक्षिणः नभस्वान् इव आददे।

**तात्पर्यम्**

यथा दक्षिणवायुः अनुष्णाशीतः सन् सर्वान् रमयति तथैव नातिमृदुना नातिकठिनेन दण्डेन (यथापराधदण्डत्वेन) रघुणापि प्रजाः वशीकृताः।

**बोधप्रश्नाः**

1. रघुवंशमहाकाव्यस्य कर्ता कः
2. रघुवंशमहाकाव्ये कति सर्गाः सन्ति
3. रघुवंशमहाकाव्यस्य चतुर्थसर्गस्य कति श्लोकाः सन्ति
4. कालिदासः कीदृशः कविः। तस्य परिचयं कुरुत।
5. रघोः राज्यप्राप्तिं वर्णयत।

**शब्दावली**

पुरुहूतध्वजः, पित्र्यम्, नभवस्वान्, अरिमण्डलम्

**सारांशः**

रघोः गुणानां ज्ञानं छात्रैः संप्राप्तम्

छात्राणां कालिदासस्य काव्यशैलीज्ञानमभूत्

## द्वितीयः खण्डः - रघोर्यशः

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. चतुर्थसर्गस्य सारांशः
4. चतुर्थसर्गस्य प्रथमश्लोकादारभ्य अष्टाविंशतिश्लोकपर्यन्तभागः (श्लोकः, पदच्छेदः, अन्वयः, तात्पर्यम्)
5. बोधप्रश्नाः
6. शब्दावली
7. सारांशः
8. अभ्यासप्रश्नाः
9. संदर्भग्रन्थसूची
10. सहायकग्रन्थसूची

### प्रस्तावना

रघोः यशः इति अनेन पाठेन राजा रघुः दिग्विजयार्थं प्राचीमुद्दिश्य प्रस्थितो भवति। तत्र पूर्वं सुह्मानां ततश्च वङ्गानां जयो वर्णितः। ततः क्रमशः पूर्वदेशानां जयवर्णनपुरस्सरं दक्षिणाशां प्रति गमनं वर्णितं विद्यते।

**उद्देश्यम्**

1. महाकाव्यशैलीज्ञानम्
2. रघोः गुणानां ज्ञानम्
3. कालीदासस्य काव्यशैलीज्ञानम्
4. नूतनानां शब्दानां ज्ञानम्
5. वाक्यरचना कौशलसम्पादनम्
6. पौराणिकेतिहासस्य ज्ञानम्

अथ रघोः सुप्रबन्धेन प्रजावर्गस्य दिलीपकतृकसुप्रबन्धस्य विस्मरणमाह-

**९.मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।**

**फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ४-९॥**

**पदच्छेदः**

मन्दोत्कण्ठाः, कृताः, तेन, गुणाधिकतया, गुरौ, फलेन, सहकारस्य, पुष्पोद्गमे, इव प्रजाः ।

**अन्वयः**

तेन प्रजाः गुरौ सहकारस्य फलेन पुष्पोद्गमे इव गुणाधिकतया मन्दोत्कण्ठाः कृताः ।

**तात्पर्यम्**

मानवाः आम्रफलमवाप्य यथा तत्कलिकायां न्यूनादारा भवन्ति तथैव रघोः उत्तमोत्तमान् गुणान् दृष्ट्वा दिलीपं प्रति स्वल्पौत्सुक्या जाताः।

१०.अथ रघोः सदसतोर्मध्ये सदेवाभिमतमासीदित्याह-

**नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।**

पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ ४-१०॥

**पदच्छेदः**

नयविद्भिः,नवे, राज्ञि ,सद्, असद्, च,उपदर्शितम् , पूर्व ,एव,अभवत्, पक्षः, तस्मिन्, न, अभवत्, उत्तरः।

**अन्वयः**

नयविद्भिः नवे राज्ञि सद् असद् च उपदर्शितम्।तस्मिन् पूर्वः पक्षः एव अभवत् उत्तरः न अभवत्।

**तात्पर्यम्**

नीतिवेत्रा मन्त्रिभिः रघोः सकाशे धर्मयुद्धं कूटयुद्धं च प्रदर्शितम्।किन्तु रघुः केवलं धर्मयुद्धपक्षमेव आश्रितवान्।

अथ रघोः राज्ये द्रव्येषु गुणानां गन्धादीनामुत्कर्षमाह-

११.पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ४-११॥

**पदच्छेदः**

पञ्चानाम्, अपि, भूतानाम्, उत्कर्षम्, पुपुषुः गुणाः, नवे, तस्मिन्, महीपाले, सर्वम्, नवम् , इव,अभवत् ।

**अन्वयः**

पञ्चानाम् अपि भूतानां गुणाः उत्कर्षं पुपुषुः। तस्मिन् नवे महीपाले सति सर्वं नवं इव अभवत् ।

**तात्पर्यम्**

रघुणा यदा राज्यंप्राप्तम् तदा एव पृथिव्यप्तेजोवाय्वाकाशानां पन्चमहाभूतानामपि गन्ध-रस-रूप-स्पर्श-शब्दाख्या गुणाः उत्कर्षम् आपुः। नूतने महीपाले सम्प्राप्ते सर्वमपि वस्तु नूतनमिव अभवत् ।

अथ रघुरन्वर्थो राजाऽभूदित्याह-

**१२.यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।**

**तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ ४-१२॥**

**पदच्छेदः**

यथा, प्रह्लादनात् ,चन्द्रः ,प्रतापाद्, तपनः, यथा, तथा, एव, सः, अभूत्, अन्वर्थः ,राजा ,प्रकृतिरञ्जनात्।

**अन्वयः**

यथा चन्द्रः प्रह्लादनात् अन्वर्थः अभूत् यथा तपनः प्रतापाद् अन्वर्थः तथा एव सः राजा प्रकृतिरञ्जनात् अन्वर्थः अभूत्।

**तात्पर्यम्**

यथा आह्लादजनकत्वात् चन्द्रः चन्द्रपदेन, सन्तापजनकत्वात् तपनः तपनशब्देनव्यवह्रियतेतथैव प्रजायाः स्वस्मिन् अनुरागजननात् रघुः अपि राजा इति शब्देन व्यवह्रियतेस्म।

अथ चक्षुष्मतोऽपि रघोर्लोचनं शास्त्रमेवासीदित्याह-

**१३.कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।**

**चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ ४-१३॥**

**पदच्छेदः**

कामम्, कर्णान्तविश्रान्ते, विशाले, तस्य, लोचने, चक्षुष्मत्ता, तु, शास्त्रेण, सूक्ष्मकार्यार्थदर्शिना।

**अन्वयः**

विशाले तस्य लोचने कामं कर्णान्तविश्रान्ते (आस्ताम् ) तु चक्षुष्मत्ता सूक्ष्मकार्यार्थदर्शिना शास्त्रेण एव (आसीत्) ।

**तात्पर्यम्**

यद्यपि रघोः नेत्रे अत्यन्तं श्रोत्रयोः प्रान्तौ गते अतिसुन्दरे आस्ताम् तथापिरघुः केवलं ताभ्यामेव नेत्रवान् इति न अपितु अप्रत्यक्षान् पदार्थान् शास्त्ररूपलोचनेनैव अवलोकयन् सः चक्षुष्मान् जातः।

अथ रघोः दिग्विजय योग्यः समयः शरदृतुः प्राप्त इत्याह-

**१४.लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।**

**पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ ४-१४॥**

**पदच्छेदः**

लब्धप्रशमनस्वस्थम्, अथ, एनम्, समुपस्थिता, पार्थिवश्रीः, द्विंतीया, इव , शरद् पङ्कजलक्षणा।

**अन्वयः**

अथ लब्धप्रशमनस्वस्थम् एनं पङ्कजलक्षणा शरद् द्विंतीया पार्थिवश्रीः इव समुपस्थिता।

**तात्पर्यम्**

लब्धप्रशमः सः रघुः यदा राज्यं प्राप्तवान् तदैवे सर्वत्र शान्ति संस्थाप्य स्वस्थः जातः। एवं च शरदृतुः विकसितेन पङ्कजव्याजेन अपरा राजलक्ष्मीः इव तं सेवितवती।

अथ शरदृतोः गुणान् वर्णयन् कविरादौ सूर्यस्य रघोश्च साम्यस्थितिमाह-

**१५.निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।**

**प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥ ४-१५॥**

**दच्छेदः**

निर्वृष्टलघुभिः ,मेघैः, मुक्तवर्त्मा, सुदुःसहः,प्रतापः, तस्य ,भानोः,च,युगपत्, व्यानशे, दिशः।

**अन्वयः**

निर्वृष्टलघुभिः मेघैः मुक्तवर्त्मा अत एव सुदुःसहः तस्य भानोः च प्रतापः युगपत् दिशः व्यानशे।

**तात्पर्यम्**

वृष्ट्यनन्तरं यथा धवलजलदस्य परित्यक्तपन्थाःसूर्यः स्वतीव्रप्रकाशैः जनान् सन्तापयति तथैव तस्य रघोरपि राज्ञः प्रतापः सर्वासु दिक्षु प्रसृतः ।

अथेन्द्रस्य वार्षिकधनुः संहारानन्तरं रघोर्जैत्रधनुर्धारणमाह-

**१६.वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।**

**प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ ४-१६॥**

**पदच्छेदः**

वार्षिकम्, संजहार, इन्द्रः, धनुः , जैत्रं, रघुः, दधौ, प्रजार्थसाधने, तौ, हि, पर्यायोद्यतकार्मुकौ।

**अन्वयः**

इन्द्रः वार्षिकं धनुः संजहार रघुः जैत्रं धनुः दधौ हि तौ प्रजार्थसाधने पर्यायोद्यतकार्मुकौ आस्ताम्।

**तात्पर्यम्**

देवेन्द्रेण शरदृतौ वर्षाकालिकं शरासनं संहृतम्। राज्ञा रघुणा जयशीलं स्वचापं लोकविजयाय गृहीतम्। इन्द्ररघू क्रमशः स्वं स्वं धनुः गृहीत्वा प्रजायाः अर्थसाधने वृष्टिरूपेण दिग्विजयेन च सर्वदा तत्परौ आस्ताम् ।

अथ शरद्दकर्तुकं रघो राजचिह्नस्य छत्रचामररूपस्य सानुकरणमाह-

**१७.पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।**

**ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ ४-१७॥**

**पदच्छेदः**

पुण्डरीकातपत्रः,तम्, विकसत्काशचामरः, ऋतुः, विडम्बयामास, न ,पुनः, प्राप, तच्छ्रियम्

**अन्वयः**

पुण्डरीकातपत्रः विकसत्काशचामरः ऋतुः तम् विडम्बयामास, पुनः तच्छ्रियम् न प्राप।

**तात्पर्यम्**

शरदृतुः घवलकमलरूपेण छत्रेण प्रस्फुरितकाशतृणरूपेण चामरेण सहितेन च रघोः अनुकरणं कृतवान्। किन्तु रघोः याखलु शोभा आसीत् ताम् शोभाम् प्राप्तुम् असमर्थः आसीत्।

अथ सर्वासां प्रजानां तस्मिन् रघौ पूर्णतमा प्रीतिरासीदित्याह-

**१८.प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।**

**तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ ४-१८॥**

**पदच्छेदः**

प्रसादसुमुखे, तस्मिन्, चन्द्रे, च, विशदप्रभे, तदा ,चक्षुष्मताम्, प्रीतिः,आसीत्, समरसा, द्वयोः ।

**अन्वयः**

प्रसादसुमुखे तस्मिन् विशदप्रभे चन्द्रे च द्वयोः तदा चक्षुष्मताम् प्रीतिः समरसा आसीत्।

**तात्पर्यम्**

जनाःशरदृतौ यथा निर्दुष्टं चन्द्रं विलोख्य प्रसन्नाः जाताः तथैव, चारुकान्तिमन्तं रघुं दृष्ट्वा अपि ते प्रसन्ना जाताः ।

अथ रघुवंशसां धवलिमवर्णनमाह-

**१९.हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।**

**विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ ४-१९॥**

**पदच्छेदः**

हंसश्रेणीषु, तारासु ,कुमुद्वत्सु, च, वारिषु , विभूतयः, तदीयानाम्, पर्यस्ता, यशसाम्, इव ।

**अन्वयः**

हंसश्रेणीषु तारासु कुमुद्वत्सु वारिषु च: तदीयानाम् यशसाम् विभूतय: पर्यस्ता: इव ।

**तात्पर्यम्**

शरदृतौ हंसावलीषु तारासु कुमुदयुक्तेषु सरोवरादिषु च रघुसंबन्धिनां यशसां संपत्तयः एव धवलिमसमृद्धिः प्रसारिताः इव आसीत् किम् । अत्र उत्प्रेक्षा । अन्यथा कथमेषां धवलतेति भावः ।

ग्रामीणस्त्रियोऽपि रघुयशोगानपरायणा आसन्नित्याह-

**२०.इक्षुच्छायनिषादिन्य स्तस्य गोप्तुर्गुणोदयम् ।**

**आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ ४-२०॥**

**पदच्छेदः**

इक्षुच्छायनिषादिन्य:,तस्य, गोप्तु:, गुणोदयम्, आकुमारकथोद्धातम्, शालिगोप्य:, जगु, यशः।

**अन्वयः**

इक्षुच्छायनिषादिन्य: शालिगोप्य: गोप्तु: तस्य गुणोदयं, आकुमारकथोद्धातम् यशः जगु:।

**तात्पर्यम्**

इक्षूणां छायासु समुपविष्टवन्तः शस्यपालिकाः स्त्रियः रघोः कौमारादारभ्य शौर्यादिगुणयुक्तं कीर्तिंअकथयन् ।

अथ रघोः प्रतापोदयेन निजाभिभवशङ्कया शत्रूणां मनः क्षुभितं बभूवेत्याह-

**२१.प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।**

**रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः॥ ४-२१॥**

**पदच्छेदः**

प्रससाद, उदयात्, अम्भः, कुम्भयोने:, महौजसः, रघो:, अभिभवाशङ्कि, चुक्षुभे, द्विषताम्, मनः।

**अन्वयः**

महौजसः कुम्भयोने: उदयात् अम्भः प्रससाद। महौजसः रघो उदयात् अभिभवाशङ्कि द्विषताम् मनः चुक्षुभे।

**तात्पर्यम्**

नक्षत्रस्यअगस्त्यस्य प्रादुर्भावात् सकर्दमं तीर्थं जातम् । बलिनः दिलीपकुमारस्य रघोः विजयप्रस्थानम् आकर्ण्य शत्रूणां चित्तं पराभवशङ्काया क्षोभयुक्तं जातम्।

अथ रघोर्महोक्षवच्छौर्यमासीदित्याह-

**२२.मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।**

**लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्॥ ४-२२॥**

**पदच्छेदः**

मदोदग्राः, ककुद्मन्तः, सरिताम्, कूलमुद्रुजाः, लीलाखेलम्, अनुप्रापुः महोक्षाः, तस्य, विक्रमम्।

**अन्वयः**

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः महोक्षाः लीलाखेलम् तस्य विक्रमम् अनुप्रापुः।

**तात्पर्यम्**

सोत्साहसमृद्धिवपुष्मतः परदमनशीलस्य रघोः शौर्यस्य, मदेन उन्मत्तः महाककुदः वृषभाः नदीतटमुत्पाटय स्वशृङ्गैः अनुकरणं कृतम्।

अथ रघोः सैन्ये मदोन्मत्ता गजेन्द्रा आसन्नित्याह-

**२३.प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।**

**असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः॥ ४-२३॥**

**पदच्छेदः**

प्रसवैः, सप्तपर्णानां, मदगन्धिभिः, आहताः, असूयया, इव, तन्नागाः, सप्तधा, एव, प्रसुस्रुवुः।

**अन्वयः**

मदगन्धिभिः सप्तपर्णानां प्रसवैः आहताः तन्नागाः असूयया इव सप्तधा एवप्रसुस्रुवुः।

**तात्पर्यम्**

रघुसेनायां विद्यमानाः गजाः सप्तपर्णकुसुमानां गन्धं स्वीकृत्यायं वन्यगजामदगन्ध इव स्पर्धया इव करकटादिभ्यः स्वयमपि सप्तस्थानेभ्यः मदं ववृषुः।

असौ शरदृतुः दिग्विजयाय रधुं प्रथमं प्रेरयामासेत्याह–

**२४.सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।**

**यात्रायै चोदयामास तं शक्तेः प्रथमं शरत्॥ ४-२४॥**

**पदच्छेदः**

सरितः, कुर्वती, गाधाः, पथः, च, आश्यानकर्दमान्, यात्रायै, चोदयामास, तम्, शक्तेः, प्रथमम्, शरद्।

**अन्वयः**

सरितः गाधाः कुर्वती पथ: च आश्यानकर्दमान् कुर्वती शरद् तं शक्तेः प्रथमम् यात्रायै चोदयामास।

**तात्पर्यम्**

शरदि सरिताः सुप्रतराः सम्पन्नाः ।पन्थानश्च पङ्करहिताः बभुवुः।शरदृतुना रघुः उत्साहशक्तेः प्रथमं विजययात्रायै प्रेरितः।

अथ रघोर्यात्रासमये शुभशकुनं सूचयन् वह्निः प्रदक्षिणार्चिबभूवेत्याह-

**२५.तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।**

**प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ॥ ४-२५॥**

**पदच्छेदः**

तस्मै, सम्यग् , हुतः, वह्निः वाजि-नीराजनाविधौ, प्रदक्षिणार्चि-र्व्याजेन, हस्तेन, इव, जयम्, ददौ।

**अन्वयः**

वाजि-नीराजनाविधौ सम्यग् हुत: वह्नि: प्रदक्षिणार्चि-र्व्याजेन हस्तेन इव तस्मै जयं ददौ।

**तात्पर्यम्**

रघुणा नीराजनाख्यशान्तिकर्म यथाशास्त्रं कुर्वता वह्नौ हवनीयं द्रव्यं यदा तर्पितम्तदैव वह्निना प्रदक्षिणाज्वालया तस्मै स्वकरेणेव विजयः प्रदत्तः।

अथ रघोः दिग्विजययात्रां सूचयति-

**२६.स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।**

**षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥ ४-२६॥**

**पदच्छेदः**

सः, गुप्त-मूल-प्रत्यन्तः, शुद्ध-पार्ष्णिः, अयान्वितः, षड्विधम्, बलम्, आदाय, प्रतस्थे, दिग्जिगीषया।

**अन्वयः**

गुप्त-मूल-प्रत्यन्तः शुद्ध-पार्ष्णि: अयान्वितः स: षड्विधम् बलम् आदाय दिग्जिगीषया प्रतस्थे।

**तात्पर्यम्**

पित्राप्राप्तस्य राज्यस्य प्रबन्धं सम्पाद्य पृष्ठशत्रुं च व्यापाद्य मङ्गलाचारपूर्वकः शुभावहविधियुक्तः षड्विधं सेनां गृहीत्वा रघुः जेतुमिच्छया दिग्विजयं कर्तुं प्रस्थितवान्।

अथ दिग्विजयाय प्रस्थितस्य तस्य रघोरुपरि पौरवृद्धाङ्गनानां लाजप्रक्षेपमाह-

**२७.अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।**

**पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम्॥ ४-२७॥**

**पदच्छेदः**

अवाकिरन्, वयोवृद्धाः ,तम्,लाजैः, पौरयोषितः, पृषतै,मन्दरोद्धूतैः,क्षीरोर्मयः, इव,अच्युतम्।

**अन्वयः**

वयोवृद्धाः पौरयोषितः तं लाजैः मन्दरोद्धूतैः पृषतैः क्षीरोर्मयः अच्युतम् इव अवाकिरन्।

**तात्पर्यम्**

दिग्विजयाय गमनोद्यतस्य रघोरुपरि वयोवृद्धाः पौरयोषितः लाजैःवर्षा चक्रुः, यथा समुद्रमन्थनसमये अच्युतस्य उपरि क्षीरसागरवीजयः मन्द्राजलादुत्पन्नैः जलबिन्दुभिःवर्षा चक्रुः।

अथ युग्मेन प्रथमं रघोः प्राच्यां दिशि गमनमभूदित्याह-

**२८.स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।**

**अहितानिलोद्धूतैस्तर्जयन्निव केतुभिः॥ ४-२८॥**

**पदच्छेदः**

सः, ययौ, प्रथमम्, प्राचीम्, तुल्यः, प्राचीनबर्हिषा, अहितान्, अनिलोद्धूतैः, तर्जयन्, इव, केतुभिः।

**अन्वयः**

प्राचीनबर्हिषा तुल्यः सः अनिलोद्धूतै केतुभिः अहितान् तर्जयन् इव प्रथमम् प्राचीं ययौ।

**तात्पर्यम्**

देवेन्द्रसदृशेन रघुणा पवनेन उत्क्षिप्तैः स्वकीयैः सेनाध्वजैः शत्रून् भत्स्र्यता इव प्रथमं पूर्वां दिशं प्रति प्रस्थितम्।

**बोधप्रश्नाः**

1. कुम्भयोनिः कः
2. शरत् कथं चोदयामास
3. प्राचीनबर्हिषा तुल्यः कः

**शब्दावली**

प्राचीनबर्हिः, गुप्तमूलप्रत्यन्तः, शुद्धपार्ष्णिः, ककुद्मन्तः

**सारांशः**

महाकाव्यशैलीज्ञानं छात्राः जातम्

रघोः गुणानां ज्ञानं छात्राः संप्राप्ताः

छात्राणां कालिदासस्य काव्यशैलीज्ञानमभूत्

नूतनानां शब्दानां ज्ञानं जातम्

वाक्यरचनाकौशलं संपादितम्

पुराणेतिहासस्य ज्ञानमभूत्

## तृतीयः खण्डः – रघोः जैत्रयात्रारम्भः

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. चतुर्थसर्गस्य एकोनत्रिंशत् श्लोकात् आरभ्य अष्टचत्वारिंशत् श्लोकपर्यन्त भागः ( श्लोकः, पदच्छेदः, अन्वयः, तात्पर्यम्)
4. बोधप्रश्नाः
5. शब्दावली
6. सारांशः
7. अभ्यासप्रश्नाः
8. सन्दर्भग्रन्थसूची
9. सहायकग्रन्थसूची

### प्रस्तावना

रघो: जैत्रयात्रारम्भः इति अनेन पाठेन अवगन्तुं शक्यते यत्र राजा रघुः दिग्विजयार्थं प्राचिमुदिश्य प्रस्थितो भवति। दिग्विजयगमनवेलायां मार्गे प्रकृतेः स्वरूपं तत्र जलाशयाः, वनानि, मरुप्रान्तादीनां वर्णननं सुष्ठु अवगन्तुं शक्यते। इतः परं पूर्वसागरस्य प्राप्तेः परं तत्र भागिरथी गङ्गायाः दर्शनं अनेन कृतम्। एवंञ्च क्रमशः तान् तान् दिशान् गत्वा सर्वत्रापि जयं सम्प्राप्य स्वस्य सामर्थ्यं प्रतिपादितवान्। इतः परं

बङ्गदेशस्योपरि विजयं प्राप्य महेन्द्रगिरिं प्रति गत्वा तस्मिन् स्वस्य प्रतिष्ठा स्थापिता। तत्र महेन्द्राधिपस्य राष्ट्रं विजित्य तस्य राजलक्ष्मीं अपहृतवान् इति। ततः परं अयं राजा रघु दक्षिणदिशि प्रस्थितवान्।

**उद्देश्यम्**

7. महाकाव्यशैलीज्ञानम्
8. रघोः गुणानां ज्ञानम्
9. कालीदासस्य काव्यशैलीज्ञानम्
10. नूतनानां शब्दानां ज्ञानम्
11. वाक्यरचना कौशलसम्पादनम्
12. पौराणिकेतिहासस्य ज्ञानम्

अथकवीरघोःसैन्यबाहुल्यंद्योतयन्नाह-

**रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः।**

**भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम्॥४-२९॥**

**पदच्छेदः**

रजोभिः, स्यन्दनोद्धूतैः,गजैः ,च, घनसंनिभैः, भुवस्तलम्,इव, व्योम, कुर्वन्, व्योम, इव, भूतलम्।

**अन्वयः**

स्यन्दनोद्धूतैः रजोभिः घनसंनिभैः गजैः च व्योम भुवस्तलम् इव भूतलम्व्योम इव कुर्वन्ययौ।

**तात्पर्यम्**

राजा रघुः स्वकीयैः सैन्यगजैः, भूतलं घनयुक्तं व्योम इव तथा स्यन्दनैः उत्थापितानि धूलिभिः, आकाशं धूलियुक्तं धरातलमिव कुर्वन्जगाम।

अथ रघोःसैन्यगमनं वर्णयन्नाह-

**प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।**

**ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥४-३०॥**

**पदच्छेदः**

प्रतापः, अग्रे, ततः,शब्दः, परागः तदनन्तरम्, ययौ, पश्चाद्, रथादि, इति, चतुःस्कन्धा, इव, सा, चमूः।

**अन्वयः**

अग्रे प्रतापः ततः शब्दः तदनन्तरं परागः पश्चाद्रथादि इति चतुःस्कन्धा, इव, सा, चमूःययौ।

**तात्पर्यम्**

आदौ तेजः, ततः सेनायाः कोलाहलः, तस्यानन्तरं रथस्य धूलिः, ततःस्यन्दनादयः, एवं व्यूहचतुष्टयवती रघोः सेना दिग्विजयार्थं पूर्वं प्राचीमुद्दिश्य प्रस्थितवान्।

स्थलेऽपि च सर्वत्र सुखेन गमनमासीदित्याह-

**मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः।**

**विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः॥४-३१॥**

**पदच्छेदः**

मरुपृष्ठानि, उदम्भांसि, नाव्याः, सुप्रतराः, नदीः, विपिनानि, प्रकाशानि, शक्तिमत्त्वात्, चकार,सः।

**अन्वयः**

सः शक्तिमत्त्वान्मरुपृष्ठानि उदम्भांसि चकार नाव्याः नदीः सुप्रतराः चकार विपिनानि प्रकाशानि चकार।

**तात्पर्यम्**

सर्वसामर्थ्यशालिनः राजा रघुः स्वविजययात्रासमये मरुप्रदेशान् जलयुक्तान्कृतवान्। नावा तरणयोग्या नद्यः सुखतारणयोग्याः तेन कृताः। वनानि च वृक्षच्छेदादिना प्रकाशयुक्तानि कृतानि। शक्तिमत्वात्तस्य किमपि असाध्यं नास्ति इति प्रतिभाति।

अथ पूर्वीयसिन्धुतटमुद्दिश्य गच्छन्तीं महतीं सेनां नयतो रघोः शोभां वर्णयन्नाह-

**ससेनां महतीं कर्षन्पूर्वसागरगामिनीम्।**

**बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः॥४-३२॥**

**पदच्छेदः**

सः, सेनाम्, महतीम्, कर्षन्, पूर्वसागरगामिनीम्, बभौ, हरजटाभ्रष्टाम्, गङ्गाम्, इव, भगीरथः।

**अन्वयः**

पूर्वसागरगामिनीं महतीं सेनां कर्षन्हरजटाभ्रष्टां (पूर्वसागरगामिनीम्) गङ्गां कर्षन्भगीरथः इव बभौ।

**तात्पर्यम्**

दिग्विजयार्थं पूर्वदिशि प्रस्थितः रघुः स्वसेनां पूर्वसागरपर्यन्तं नयन्, शिवस्य मस्तकान्निर्गलितां गङ्गां पूर्वसागरं नयन्भगीरथः इव शोभामुवाह इति।

अथ रघोः सैन्यमार्गः प्रतिबन्धरहित आसीदित्याह–

**त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः।**

**तस्यासीदुल्बणो मार्गःपादपैरिव दन्तिनः॥४-३३॥**

**पदच्छेदः**

त्याजितैः, फलम्, उत्खातैः, भग्नैश्च, बहुधा, नृपैः, तस्य, आसीत्, उल्बणः, मार्गः,पादपैः,इव, दन्तिनः।

**अन्वयः**

फलं त्याजितैः उत्खातैः बहुधा भग्नैश्च नृपैः पादपैः दन्तिनः इव तस्य मार्गः उल्बणः आसीत्।

**तात्पर्यम्**

यथा बलिष्ठः मदोन्मत्तगजः मार्गे वर्तमानान्पादपान् फलरहितान्विधाय कांश्चिच्च उन्मूलितान्कृत्वा चूर्णीकृत्य स्वपथं निष्प्रतिबन्धं करोति। तथैव रघुणापि कांश्चित्राज्ञः लाभरहितान्कृत्वा कांश्चिच्च पदभ्रष्टान्विधाय कांश्चिच्च युद्धे हत्वा स्वमार्गः कण्टकशून्यः स्पष्टः कृतः।

अथ दिग्विजयं कुर्वतो रघोः पूर्वसमुद्रतटसमीपप्राप्तिमाह-

**पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी।**

**प्राप तालीवनश्याममुपकण्ठं महोदधेः॥४-३४॥**

**पदच्छेदः**

पौरस्त्यान्, एवम्, आक्रामन्, तान्, तान्, जनपदान्, जयी, प्राप तालीवनश्यामम्, उपकण्ठम्, महोदधेः।

**अन्वयः**

जयी एवम्पौरस्त्यान्तान्तान्जनपदान् आक्रामन्तालीवनश्यामम्महोदधेः उपकण्ठम्प्राप।

**तात्पर्यम्**

जयनशीलः रघु इत्थं पूर्वदिग्भवान्तान्तान्दिग्भागान् आक्रामन्, सर्वत्र विजयं प्राप्य तालवृक्षाणां वनैः कृष्णं सागरस्य तटसमीपम् प्राप्नोत्।

अथ रघोः सकाशात्सुह्मदेशीयानां नृपाणां पादप्रणत्या आत्मसंरक्षणमाह-

**अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव।**

**आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम्॥४-३५॥**

**पदच्छेदः**

अनम्राणाम्, समुद्धर्तुः, तस्मात्, सिन्धुरयात्, इव, आत्मा,संरक्षितः,सुह्मैः, वृत्तिम्, आश्रित्य, वैतसीम्।

**अन्वयः**

अनम्राणाम्समुद्धर्तुः तस्मात्सिन्धुरयात् इव सुह्मैः वैतसीं वृत्तिम् आश्रित्य आत्मा संरक्षितः।

**तात्पर्यम्**

यथा नदीजलस्य वेगाद्वेतस्या नम्रीभूय स्वरक्षा क्रियते, तथैव सुह्मदेशीयैः क्षत्रियैः नाम राजभिः रघुपादयोः प्रणतिं कृत्वा स्वरक्षा कृता। "बलीयसाभियुक्तः दुर्बलः सर्वत्र अनुप्रणतः वेतसधर्मम् आतिष्ठेत्" – कौटिल्यः।

अथ रघुकर्तृकं वङ्गदेशीयानां राज्ञां पराभवमाह-

**वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान्।**

**निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः॥४-३६॥**

**पदच्छेदः**

वङ्गान्, उत्खाय, तरसा, नेता, नौसाधनोद्यतान्, निचखान, जयस्तम्भान्, गङ्गास्रोतोन्तरेषु, सः।

**अन्वयः**

नेता सः नौसाधनोद्यतान्वङ्गान् तरसा उत्खाय गङ्गास्रोतोन्तरेषु जयस्तम्भान्निचखान।

**तात्पर्यम्**

नौकारूपयुद्धसाधनसन्नद्धान्वङ्गदेशीयात्राज्ञः बलेन विजित्य नायकः रघुः गङ्गाप्रवाहमध्यस्थेषु द्वीपेषु स्वविजयस्मारकान्जयस्तम्भान्स्थापितवान्|

अथ रघोः समीपे विजितवङ्गदेशीयराजकर्तृकमुपहारस्वरूपधनार्पणमाह-

**आपादपद्मप्रणताः कलमा इव ते रघुम्।**

**फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥४-३७॥**

**पदच्छेदः**

आपादपद्मप्रणताः, कलमाः, इव, ते, रघुम्, फलैः,संवर्धयामासुः ,उत्खातप्रतिरोपिताः।

**अन्वयः**

आपादपद्मप्रणताः,अत एव उत्खातप्रतिरोपिताःते कलमाः इव रघुम्फलैः संवर्धयामासुः।

**तात्पर्यम्**

यथा कलमाख्याः शालिविशेषाः पूर्वम् उत्पाट्य पश्चात्प्रतिशेपिताः सस्यसमृद्धिं वर्धयन्ति, तथैव पूर्वं स्वस्थलाच्च्याविताः पश्चात्प्रतिष्ठापिताः वङ्गीयाः रघुं धनादिभिः उपढौकनादिभिः द्रव्यैः संवर्धयामासुः|

अथ रघुर्वङ्गान्विजित्य कलिङ्गाभिमुखो ययावित्याह-

**सतीर्त्वाकपिशांसैन्यैर्बद्धद्विरदसेतुभिः।**

**उत्कलादर्शितपथःकलिङ्गाभिमुखोययौ ॥४-३८॥**

**पदच्छेदः**

सः तीर्त्वा, कपिशाम्, सैन्यैः, बद्ध-द्विरद-सेतुभिः, उत्कला-दर्शित-पथः, कलिङ्गाभिमुखो, ययौ।

**अन्वयः**

सः बद्ध-द्विरद-सेतुभिः, सैन्यैः कपिशां तीर्त्वा उत्कला-दर्शित-पथः कलिङ्गाभिमुखो ययौ।

**तात्पर्यम्**

स: रघुः स्वसेनागजैः एव सेतुं निर्माय कपिशानाम्नीं नदीं तीर्त्वा उत्कलदेशीयैः राजभिः प्रदर्शितमार्गः सन्कलिङ्गदेशं लक्ष्यीकृत्य प्रस्थितवान्।

अथ रघोः प्रतापोमहेन्द्रपर्वतशिखरेव्याप्तो बभूवेत्याह-

**सप्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत्।**

**अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः॥४-३९॥**

**पदच्छेदः**

सः, प्रतापम्, महेन्द्रस्य, मूर्ध्नि, तीक्ष्णम्, न्यवेशयत्, अङ्कुशम्द्विरदस्य, इव, यन्ता, गम्भीरवेदिनः, प्रतिजग्राह।

**अन्वयः**

सः महेन्द्रस्य मूर्ध्नि तीक्ष्णं प्रतापं यन्ता गम्भीरवेदिनः द्विरदस्य मूर्ध्नि तीक्ष्णम् अङ्कुशम् इव न्यवेशयत्।

**तात्पर्यम्**

यथा हस्तिपकः गजरक्षकः वा गम्भीरवेदिनः गजस्य मस्तके तीव्रम् अङ्कुशं निवेशयति, तथैव रघुणापि महेन्द्राचलस्य शिरोवरे स्वतेजःप्रतिष्ठापीतवान्।

अथ कलिङ्गदेशाधिपो युद्धार्थं रघोरभिमुखो बभूवेत्याह-

**प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः।**

**पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः॥४-४०॥**

**पदच्छेदः**

प्रतिजग्राह, कालिङ्गः, तम्, अस्त्रैः, गजसाधनः, पक्ष-च्छेदोद्यतम्, शक्रम्, शिला-वर्षी, इव, पर्वतः।

**अन्वयः**

गजसाधनः कालिङ्गः अस्त्रैः तं पक्षच्छेदोद्यतं शक्रं शिलावर्षी पर्वतः इव प्रतिजग्राह।

**तात्पर्यम्**

यथा कश्चित्पर्वतः स्वपक्षाणां छेदोद्युक्तं शक्रं शिलावर्षैः प्रतिरुरोध, तथैव गजसाधनवान्कलिङ्गदेशीयः राजा शस्त्रैःरघुं प्रत्याभियुक्तवान्।

अथ रघोर्विजयलाभो बभूवेत्याह-

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम्।

सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम्॥४-४१॥

**पदच्छेदः**

द्विषाम्, विषह्य, काकुत्स्थः, तत्र, नाराच-दुर्दिनम्, सन्मङ्गल-स्नात, इव, प्रतिपेदे,जयश्रियम्।

**अन्वयः**

काकुत्स्थः तत्र द्विषां नाराच-दुर्दिनं विषह्य सन्मङ्गल-स्नातः इव जयश्रियं प्रतिपेदे।

**तात्पर्यम्**

काकुस्थः राजा रघुः तत्र महेन्द्राद्रौ शत्रूणां शरवर्षणं सोढ्वा यथा अस्त्रं सन्मङ्गलाभिषिक्तः इव (माङ्गलिकं सर्वौषध्यादिभिः कृतं अभिषेकम् इव) विजयं प्राप्तवान्।।

अथ महेन्द्राद्रौ रघुसैनिकाविजयमहोत्सवं चक्रुरित्याह-

**ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।**

**नारिकेलासवं योधाः शात्रवं च पपुर्यशः॥४-४२॥**

**पदच्छेदः**

ताम्बूलीनाम्, दलैः, तत्र, रचिता-पानभूमयः, नारिकेला-सवम्, योधाः, शात्रवम्, च, पपुः, यशः।

**अन्वयः**

तत्र योधाः रचितापानभूमयः नारिकेलासवं ताम्बूलीनां दलैः पपुः, शात्रवं यशःच पपुः।

**तात्पर्यम्**

तत्र महेन्द्राद्रौ रघोः योधाः आपानभूमिं विरच्य नागवल्लीपुष्पाणां पत्रैः नारिकेलमद्यम् अपिबन्, शत्रुसम्बन्धियशः च प्रापुः।

अथ रघुर्महेन्द्रनाथं कालिङ्गं विजित्य पुनरपि तं राजासने स्थापयामासेत्याह-

**गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।**

**श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥४-४३॥**

**पदच्छेदः**

गृहीत-प्रतिमुक्तस्य, सः, धर्मविजयी, नृपः, श्रियम्, महेन्द्रनाथस्य, जहार, न, तु, मेदिनीम्।

**अन्वयः**

धर्मविजयी सः नृपः गृहीत-प्रतिमुक्तस्य महेन्द्रनाथस्य श्रियं जहार मेदिनीं तु न जहार।

**तात्पर्यम्**

धर्मविजयशीलः रघुः पूर्वं विजित्य प्रतिबद्धस्य पश्चात्कृपया परित्यक्तस्य महेन्द्राधिपस्य राज्यलक्ष्मीम् एव अपहृतवान् न तु पृथिवीम्।

अथ पूर्वदिशातो दक्षिणादिशं रघुर्ययावित्याह-

**ततो वेलातटेनैव फलवत्पूगमालिना।**

**अगस्त्याचरितामाशामनाशास्यजयो ययौ॥४-४४॥**

**पदच्छेदः**

ततः वेला-तटेन, एव, फलवत्-पूग-मालिना, अगस्त्याचरिताम्, आशाम्, अनाशास्यजयः, ययौ।

**अन्वयः**

ततः फलवत्-पूग-मालिनावेला-तटेन एव अगस्त्याचरिताम् आशाम् अनाशास्यजयः 'सन्' ययौ।

**तात्पर्यम्**

प्राचीविजयानन्तरं फलयुक्तक्रमुकश्रेणीमता सुशोभितासमुद्रतटाध्वनेन अगस्त्येन अधिष्ठितां दक्षिणां दिशं प्रतस्थे। "अगस्त्यः दक्षिणमाशाम् आश्रित्य नभसि स्थितः।" ब्रह्मपुराणे।

अथ दक्षिणां दिशं गच्छन्रघुः मार्गे कावेरीं प्रापेत्याह-

**ससैन्यपरिभोगेण गजदानसुगन्धिना।**

**कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्॥४-४५॥**

**पदच्छेदः**

सः, सैन्यपरिभोगेण, गजदानसुगन्धिना, कावेरीम्, सरिताम्, पत्युः, शङ्कनीयाम्, इव अकरोत्।

**अन्वयः**

सः गजदानसुगन्धिना सैन्यपरिभोगेण कावेरीं सरितां पत्युः शङ्कनीयाम् इव अकरोत्।

**तात्पर्यम्**

सः रघुः गजानां मदेन सुरभितेन सैन्यपरिभोगेण कावेरीनदी शोभनगन्धवती तथा जाता यथा समुद्रस्य परपुरुष-उपभुक्ता इव अविश्वसनीया अभवत्।

अथ मार्गे रघुसैन्यं मलयाचलोपत्यकासु निवसति स्मेत्याह-

**बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः।**

**मारीचोद्भ्रान्तहारीतामलयाद्रेरुपत्यकाः॥४-४६॥**

**पदच्छेदः**

बलैः,अध्युषिताः, तस्य, विजिगीषोः, गताध्वनः मारीचोद्भ्रान्तहारीताः, मलयाद्रेः, उपत्यकाः।

**अन्वयः**

विजिगीषोः गताध्वनः तस्य बलैः मारीचोद्भ्रान्तहारीताः मलयाद्रेः उपत्यकाःअध्युषिताः।

**तात्पर्यम्**

विजेतुम् इच्छायुक्तस्य रघोः कियद्दूरं गतस्य सेनापुरुषैः मारीचवनेषु परिभ्रान्ताः हरिताख्यपक्षिबाहुल्यवतीषु मलयाद्रेः आसन्नभूमिषु वासम् अकरोत्।

अथ मलयाद्रेरुपत्यकाभूमिं वर्णयन्तत्र एलालतानां प्राचुर्यमासीदित्याह-

**ससङ्कुरश्वक्षुण्णानामेलानामुत्पतिष्णवः।**

**तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः॥४-४७॥**

**पदच्छेदः**

ससङ्कुः,अश्व-क्षुण्णानाम्, एलानाम्, उत्पतिष्णवः, तुल्यगन्धिषु,मत्तेभ-कटेषु, फल-रेणवः।

**अन्वयः**

अश्व-क्षुण्णानाम् एलानाम् उत्पतिष्णवःफल-रेणवः तुल्यगन्धिषु, मत्तेभ-कटेषु ससङ्कुः।

**तात्पर्यम्**

घोटकैः चूर्णितानां एलालतानाम् ऊर्ध्वगमनशीलफलानां धूलिकणाः स्वसमानगन्धयुक्तेषु सेनागजगण्डस्थलेषु पवनवशात्संपृक्ताः।

अथ मलयतरुषु बद्धान्सेनागजान्वर्णयन्नाह-

**भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।**

**नास्त्रसत्करिणां ग्रैवं त्रिपदीच्छेदिनामपि॥४-४८॥**

**पदच्छेदः**

भोगि-वेष्टन-मार्गेषु, चन्दनानाम्, समर्पितम्, न, अस्त्रसत्, करिणाम्, ग्रैवम्, त्रिपदी-च्छेदिनाम्, अपि।

**अन्वयः**

चन्दनानां भोगि-वेष्टन-मार्गेषु समर्पितं त्रिपदी-च्छेदिनाम् अपि करिणाम्ग्रैवं न अस्त्रसत्।

**तात्पर्यम्**

चन्दनपादपेषु सर्पवेष्टनेनसञ्जातरेखासु आघोरणैः निबद्धानां पादबन्धनच्छेदकारिणाम् अपि मदोन्मत्तगजानां कण्ठबन्धनानि शिथिलानि न जातानि।

**बोधप्रश्नाः**

१. कस्य राज्ञः विजययात्रावर्णनं अस्मिन् सर्गे अस्ति?
२. पादपः इति पदस्य अर्थः कः?
३. करिणां इत्यस्य अर्थः कः?

**शब्दावली**

पादपः,मस्तकम्,विजिगीषा,अध्वा,नभः इत्यादयः।

## सारांशः

1. महाकाव्यशैलीज्ञानं जातं भवति।
2. रघोः गुणविषये छात्राणां ज्ञानं जातम् भवति।
3. कालिदासस्य काव्यशैलीज्ञानं छात्राणाम् ज्ञानं जातं भवति।
4. नूतनानां शब्दानां ज्ञानं छात्राणाम् कृते जातम् भवति।
5. वाक्यरचना कौशलसम्पादने छात्राः समर्थाः जायन्ते।
6. पुराणेतिहासस्यज्ञानं छात्राणां कृते जातं भवति।

## अभ्यासप्रश्नाः

१. रघुवंश महाकाव्यस्य चतुर्थसर्गस्य सारांशं लिखत।

२. चतुर्थसर्गानुसारं रघोः दिग्विजयवर्णनं कुरुत।

३. चतुर्थसर्गात् स्वेच्छया चतुरान् श्लोकान् विलिख्य अन्वयं कुरुत।

## सन्दर्भग्रन्थसूची

१. रघुवंशमहाकाव्यम्,चौखम्बा प्रकाशनम्।

## सहायकग्रन्थसूची

१. रघुवंशमहाकाव्यम् सुबोधिन्याख्यया व्याख्यया सरलार्थतया प्राकृतभाषया संक्षिप्तार्थया च संकलितम्, काशी शारदा भवनात् समुल्लसितम् – वैक्रमाब्दाः १९८६.

## चतुर्थः खण्डः – रघोः दक्षिणपश्चिमजैत्रयात्रा

### पाठसंरचना

11.प्रस्तावना

12.उद्देश्यम्

13.चतुर्थसर्गस्य प्रथमश्लोकादारभ्य अष्टाविंशतिश्लोकपर्यन्तभागः (श्लोकः, पदच्छेदः, अन्वयः, तात्पर्यम्)

14.बोधप्रश्नाः

15.शब्दावली

16.सारांशः

17.अभ्यासप्रश्नाः

18.संदर्भग्रन्थसूची

19.सहायकग्रन्थसूची

### प्रस्तावना-

अस्मिन् भागे रघोः दिग्विजयस्य निरूपणं वर्तते।तत्र प्रसङ्गात् यात्रायां यानि स्थानानि लब्धानि तेषां स्थानानां रमणीयं वर्णनं कविना कृतम्। तद्यथा द्विपञ्चाशततमे श्लोके- "कश्चन कामुकः पुरुषः पीनोन्नतस्नजघनायाः नायिकायाः चन्दनचर्चितं स्तयुगलं सम्मर्द्य वसनावरणरहितं नितम्बञ्च यथेच्छामुपभुज्य एव तत्समीपादन्यतो गच्छति। तथैव अन्यपुरुष-असह्यमानपराक्रमः स रघुः तस्याः

दिशः स्तनाविव स्थितौ मलय दरदुरौ पर्वतौ सलिलविमुक्तं सह्यनामानं पर्वतञ्च यथेच्छमुपभुज्य ततोऽन्यतो जगाम" इति।

**उद्देश्यम्-** १. महाकाव्यशैलीज्ञानम्

२. रघोः गुणानां ज्ञानम्

३. कालिदासस्य काव्यशैलीज्ञानम्

४. नूतनानां शब्दानां ज्ञानम्

५. वाक्यरचनाकौशलसंपादनम्

६. पौराणिकेतिहासस्य ज्ञानम्

अथ रघोः प्रतापं पाण्डुदेशाधिपतयो न विषेहिर इत्याह-

**दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।**

**तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४-४९॥**

**पदच्छेदः**

दिशि, मन्दायते, तेजः, दक्षिणस्याम्, रवेः,अपि,तस्याम्, एव, रघोः, पाण्ड्याः प्रतापम् ,न , विषेहिरे।

**अन्वयः**

दक्षिणस्यां दिशि रवेः अपि तेजः मन्दायते (तथापि)तस्याम् एव पाण्ड्याः रघोः प्रतापं न विषेहिरे।

**तात्पर्यम्**

प्रखरप्रतापस्यापि भास्करस्य द्युतिः दक्षिणस्यां दिशायां मन्दं भवति परन्तु तस्यामेव दिशायां तद्देशीयीः एव नरेन्द्राः पाण्डुदेशीयाः रघोः प्रतापं सोढु समर्थाः न बभूवुःएतदत्याश्चर्यकरं यत् सूर्विजयिनोऽपि असौ विजितवानिति। रघो महान् उत्कर्षो गम्यते।

अथ रघवे पराजितानां पाण्डुदेशाधिपतीनामुपहारस्वरूपमुक्ताफलार्पणमाह-

**ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।**

**ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥ ४-५०॥**

**पदच्छेदः**

ताम्रपर्णी-समेतस्य, मुक्तासारम् ,महोदधेः, ते ,निपत्य ,ददुः, तस्मै, यशः, स्वम् , इव, यशः, सञ्चितम्।

**अन्वयः**

ते महोदधेः ताम्रपर्णी-समेतस्स्य सञ्चितं मुक्तासारं स्वं सञ्चितं यशः इव तस्मै निपत्य ददुः।

**तात्पर्यम्**

ते पाण्डुदेशीयाः राजानः ताम्रपर्णी नदी मिलितस्य समुद्रस्य सम्बन्धिसञ्चितं मुक्तासारं स्वकीयं सञ्चितं यश इव तस्मै रघवे प्रणामपूर्वकं पाययीकृतवन्तः।।

अथ रघुर्मलयदर्दुरपर्वतयोर्यथेच्छं निवासं कृत्वा सह्याद्रिमलङ्घयदिति युग्मेनाह-

**स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।**

**स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ४-५१॥**

**असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता**

**नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ४-५२॥**

**पदच्छेदः**

सः, निर्विश्य, यथाकामम्, तटेषु, आलीन-चन्दनौ, स्तनौ, इव, दिशः, तस्याः, शैलौ, मलयदर्दुरौ, असह्यविक्रमः,सह्यम्, दूरात्, मुक्तम्, उदन्वता, नितम्बम्, इव, मेदिन्याः, स्रस्तं-अंशुकम्, अलङ्घयत्।

**अन्वयः**

असह्यविक्रमः सः तटेषु आलीन-चन्दनौ तस्याः दिशः स्तनाौ इव "स्थितौ" मलय-दर्दुरौ शैलौ, यथाकामं निर्विश्य, उदन्वता दूरात् मुक्तं स्रस्तं-अंशुकं मेदिन्याः नितम्बम् इव "स्थितं" सह्यम् अलङ्घयत्।

**तात्पर्यम्**

असह्यविक्रमः सः रघुः दक्षिणस्याः दिशः स्तनयोरिव स्थितयोः मलय-दर्दुरपर्वतयोः यथेच्छं विहारम् अकरोत्। तदनन्तरं पृथिव्याः दूरात् समुद्रे परित्यक्तम्, अत एव विलासवत्याः विगलित-वस्त्रं नितम्बभागमिव स्थितं सह्याद्रिं, यथाकामं उपभुज्य तथैव प्रस्थितः।यथा कश्चित् कामी कामुक्याः चन्दनानुलेप-व्याप्त-पीवर-कुचयोः सम्मर्दनं कृत्वा निर्वस्त्रं नितम्बम् भक्त्वा अन्यतः गच्छति।

सम्प्रति प्रतीचीं दिशमभिययावित्याह-

**तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।**
**रामास्त्रोत्सारितोऽप्यासीत्सह्यलग्न इवार्णवः ॥ ४-५३॥**

**पदच्छेदः**

तस्य,अनीकैः,विसर्पद्भिः,अपरान्त-जयोद्यतैः,रामा-स्त्रोत्सारितः, अपि, आसीत्, सह्य-लग्नः, इव,अर्णवः।

**अन्वयः**

अपरान्त-जयोद्यतैः विसर्पद्भिः तस्य, अनीकैः अर्णवः रामा-स्त्रोत्सारितः अपि सह्य-लग्नः इव आसीत्।

**तात्पर्यम्**

सह्यपर्वतस्य पश्चिमदेशं गच्छन्त्या विपुलया रघुसेनया महाशूरस्य परशुरामनामकस्य अस्त्रैः दूरीकृतः अपि सागरः पुनः सह्यपर्वते संसक्तः इव दृश्यते स्म । आ पर्वतात् समुद्रं यावत् सेनाविस्तार आसीत् इति भावः । सैन्यं द्वितीयोऽर्णव इव दृश्यतेति भावः ।

अथ रघोर्महत् सैन्यं दृष्ट्वा भीताः सत्यः केरलयोषितः पलायिता आसन्नित्याह-

**भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।**

**अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ४-५४॥**

**पदच्छेदः**

भयोत्सृष्ट-विभूषाणाम्, तेन , केरल-योषिताम् , अलकेषु ,चमू-रेणुः, चूर्ण-प्रतिनिधीकृतः।

**अन्वयः**

तेन भयोत्सृष्ट-विभूषाणांकेरल-योषितां अलकेषु चमू-रेणुः चूर्ण-प्रतिनिधीकृतः।

**तात्पर्यम्**

रघुः भीत्या अलङ्कारादीन् परित्यज्य पलायमानानां केरलाङ्गनानां कुन्तलेषु सैन्यपादन्यासोत्थापितरजः कुमकुमादिसुगन्धितचूर्णस्य स्थानीयं कृतवान्।

अथ रघोः सैन्यं नदीं प्रापेत्याह-

**मुरलामारुतोद्धूतमगमत्कैतकं रजः ।**

**तद्योधवारबाणानामयत्नपटवासताम् ॥ ४-५५॥**

**पदच्छेदः**

मुरला-मारुतो-द्धूतम्, अगमत्, कैतकम्, रजः, तद्योध-वारबाणानाम्, अयत्न-पट-वासताम् ।

**अन्वयः**

मुरला-मारुतो-द्धूतं कैतकं रजः तद्योध-वारबाणानाम् अयत्न-पट-वासताम् अगमत्।

**तात्पर्यम्**

मुरला नदी वायुना उत्थापितः केतकीरागः रघुसैनिकानां कञ्चुकेशुनिपत्य प्रयाशं विनैव वसनवासनाकार्यं विदधौ

अथ पथि गच्छतो रघोर्वाहानां राजतालीवनमध्ये प्रवेशमाह-

**अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।**

**वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ४-५६ ॥**

**पदच्छेदः**

अभ्यभूयत, वाहानाम्, चरताम्, गात्र-शिञ्जितैः, वर्मभिः, पवनो-द्धूत-राजताली-वनध्वनिः।

**अन्वयः**

चरतां वाहानाम् गात्र-शिञ्जितैः वर्मभिः पवनो-द्धूत-राजताली-वनध्वनिः अभ्यभूयत।

**तात्पर्यम्**

अति वेगेन रघु सैनिकाश्वानां सञ्चालनात् अश्वारूढानां शरीरस्थलोहमयकवचेभ्यः समुद्धूतो महान् झन्झन् इति शब्दः पवनसंञ्चालित तालपत्रध्वनिमपि तिरस्कृतवान्।

अथ मदस्राविणां रघुसेनागजानां गण्डस्थले पुन्नागतरुवनाद्भ्रमराणां निपतनमाह-

**खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।**

**कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ॥ ४-५७॥**

**पदच्छेदः**

खर्जूरी-स्कन्ध-नद्धानाम्, मदो-द्गार-सुगन्धिषु ,कटेषु, करिणाम् ,पेतुः, पुंनागेभ्यः, शिलीमुखाः,

**अन्वयः**

खर्जूरी-स्कन्ध-नद्धानां करिणां मदो-द्गार-सुगन्धिषु कटेषु पुंनागेभ्यः शिलीमुखाः पेतुः।

**तात्पर्यम्**

भ्रमराः पुन्नागपुष्पाणि त्यक्त्वा रवर्जूरी-स्कन्धेषु निबद्धानां सेनागजानां मदस्त्रावेण सुगन्धिषु गण्डस्थलेषु अपतन्।

अथ पश्चिमदेशीया राजानो रघवे करं ददुरित्याह-

**अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ ।**

**अपरान्तमहीपालव्याजेन रघवे करम् ॥ ४-५८॥**

**पदच्छेदः**

अवकाशम्, किल, उदन्वान्, रामाय, अभ्यर्थित:,ददौ, अपरान्त-महीपाल-व्याजेन, रघवे, करम् ।

**अन्वयः**

उदन्वान् रामाय अभ्यर्थित: अवकाशं ददौ किल रघवे अपरान्त-महीपाल-व्याजेन करम् ददौ।

**तात्पर्यम्**

समुद्रः परशुरामाय प्रार्थितः सन् मार्गम् अदात् इति प्रसिद्धः किल । तस्मादेव समुद्रात् रघुः समुद्र-मध्यदेश-नरेन्द्र-व्याजेन प्रार्थनां विना एव करं स्वीकृतवान् (करदानं च भीत्या न तु याञ्चया इति रामात् रघोः उत्कर्षः ।

अथ रघोर्जयस्तम्भस्त्रिकूटाद्रिरभूदित्याह-

**मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।**

**त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ४-५९॥**

**पदच्छेदः**

मत्तेभ-रदनो-त्कीर्ण-व्यक्त-विक्रम-लक्षणम्, त्रिकूटम्, एव, तत्र, उच्चैः, जय-स्तम्भम्, चकार, सः।

**अन्वयः**

तत्र सः मत्तेभ-रदनो-त्कीर्ण-व्यक्त-विक्रम-लक्षणं त्रिकूटं एव उच्चैः जय-स्तम्भं चकार।

**तात्पर्यम्**

तत्र पश्चिमे दिशि (केरलदेशे) स रघुः मत्तानाम् इभानां दन्तैः क्षतानि अत एव स्फुटानि पराक्रम-चिह्नयुक्तं त्रिकूटनामकं पर्वतमेव उन्नतं जयस्तम्भम् कृतवान्।

अथ रघोः पारसीकाञ्जेतुं प्रस्थानमाह-

**पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।**

**इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ४-६०॥**

**पदच्छेदः**

पारसीकान् , ततः, जेतुम्, प्रतस्थे, स्थलवर्त्मना, इन्द्रियाख्यान्, इव, रिपून्, तत्त्वज्ञानेन, संयमी।

**अन्वयः**

ततः (सः रघुः) संयमी तत्त्वज्ञानेन इन्द्रियाख्यान् रिपून् इव पारसीकान् जेतुं स्थलवर्त्मना प्रतस्थे।

**तात्पर्यम्**

यथा कश्चित् योगी इन्द्रियरूपिणः शत्रून् तत्त्वज्ञानेन जेतुं प्रयतते तथैव सः रघुरपि पारसादेशीयान् भूपतीन् जेतुं स्थलमार्गेण प्रवृत्तः ।

अथ रघुर्यवनस्त्रीमुखानां मधुनो मदरागं न सेह इत्याह-

**यवनीमुखपद्मानां सेहे मधुमदं न सः ।**
**बालातपमिवाब्जानामकालजलदोदयः ॥ ४-६१॥**

**पदच्छेदः**

यवनी-मुख-पद्मानाम्, सेहे, मधु-मदम्, न , सः बालातपम्, इव, अब्जानाम्, अकाल-जलदोदयः ।

**अन्वयः**

सः यवनी-मुख-पद्मानां मधु-मदं अकाल-जलदोदयः अब्जानाम् बालातपम् इव न सेहे।

**तात्पर्यम्**

यथा वर्षाभिन्ने समये मेघस्य उदयः कमलानां विकसकारी प्रातःकालीनातपं न सहते, तथैव रघुरपि पारसीक-यवनाङ्गनानां मुरवकमलानां मदिरापान-जनित-रागं न सहते। (ताः पतिवियुक्ताः चक्रे ।)

अथ पारसीकैः सह रघोस्तुमुलं युद्धं बभूवेत्याह-

**सङ्ग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।**
**शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ४-६२॥**

**पदच्छेदः**

सङ्ग्रामः, तुमुलः, तस्य, पाश्चात्यैः, अश्वसाधनैः, शार्ङ्ग-कूजित-विज्ञेय-प्रतियोधे ,रजसि, अभूत् ।

**अन्वयः**

तस्य अश्वसाधनैः पाश्चात्यै (सह) शार्ङ्ग-कूजित-विज्ञेय-प्रतियोधे रजसि तुमुलः सङ्ग्रामः अभूत्।

**तात्पर्यम्**

रघोः घोटक-सेना-बाहुलयवद्भिः पाश्चात्ययवनैः साकं धनुष्टंकार- जनितशब्दैः विज्ञातुं योग्याः प्रतिभटाः यस्मिन् तस्मिन् रजसि, घोरः संग्रामः (युद्धम्) अभवत् । (रजसि उभयदलयोः स्व-पर-विज्ञानं धनुष्टंकार-जनित-शब्दैः एव विज्ञेयाः आसीत् इति घोर-सङ्ग्राम सम्पतिः ।)

अथ रघुः स्वबाणाच्छिन्नैः पारसीकानां शिरोभिः पृथ्वीं छादयामासेत्याह-

**भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।**

**तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ४-६३॥**

**पदच्छेदः**

भल्लापवर्जितैः, तेषाम्, शिरोभिः, श्मश्रुलैः,महीम् तस्तार , सरघाव्याप्तैः, सः, क्षौद्रपटलैः, इव।

**अन्वयः**

सः भल्लापवर्जितैः श्मश्रुलैः तेषां शिरोभिः सरघाव्याप्तैः क्षौद्रपटलैः इव महीं तस्तार।

**तात्पर्यम्**

स राजा रघुः प्रवृद्ध-मुरव-रोमवद्भिः पारसीकानां भल्लानामक बाणविशेषयुक्तैः कर्तितैः शिशोभिः यथा मधुमक्षिका-युक्तैः क्षौद्रसञ्चयैः (क्षुद्रभिः कृतानि क्षौद्राणि (मधूनि) क्षौद्राणां पटलानि, तैः) इव पृथ्वीमाच्छादयामास (आच्छादितवान्)।

अथ हतावशिष्टाः पारसीका राजानस्तं रघुं शरणं ययुरित्याह-

**अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।**

**प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ४-६४॥**

**पदच्छेदः**

अपनीत-शिरस्त्राणाः ,शेषा:,तम् ,शरणम्, ययुः प्रणिपातप्रतीकारः ,संरम्भ:, हि, महात्मनाम् ।

**अन्वयः**

शेषा: अपनीत-शिरस्त्राणाः तं शरणं ययुः हि, महात्मनाम् संरम्भ: प्रणिपात-प्रतीकारः (भवति)।

**तात्पर्यम्**

ये तु जीविताः आसन्, ते स्व-शिरस्त्राणम् रघोः चरणयुगलयोः समर्पितवान्। रघुनापि ते सर्वे मुक्ताः। यतः महात्मानां कोपः प्रणिपातेन एव शान्तिर्भवति ।

अथ रघोर्योधानां विजयश्रमनिवारणार्थं मद्यपानमाह-

**विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।**

**आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ४-६५॥**

**पदच्छेदः**

विनयन्ते, स्म ,तद्योधा:, मधुभि:,विजयश्रमम्, आस्तीर्णा-जिनरत्नासु, द्राक्षा-वलय-भूमिषु।

**अन्वयः**

तद्योधा: द्राक्षा-वलय-भूमिषु मधुभि: विजयश्रमम् विनयन्ते, स्म ।

**तात्पर्यम्**

राज्ञः रघोः शूराः द्राक्षावलयानां भूमिषु चर्मश्रेष्ठानि आस्तीर्य द्राक्षानिर्मितमद्यं पीत्वा युद्धश्रमात्विमक्तिमवाप। विनयन्ते स्म=अपनीतवन्त:, भूतार्थे लट् ।

अथ रघोर्दिग्विजयार्थमुदीचीं दिशामुद्दिश्य प्रस्थानमभूदित्याह-

**ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।**

**शरैरुस्त्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥ ४-६६ ॥**

**पदच्छेदः**

प्रतस्थे,कौबेरीम् ,भास्वान् , इव,रघुः, दिशं,शरैः, उस्त्रैः,इव, उदीच्यान्, उद्धरिष्यन्, रसान्,इव।

**अन्वयः**

ततः रघुः भास्वान् इव शरैः उस्त्रै इव उदीच्यान् रसान् इव उद्धरिष्यन् कौबेरीं दिशं प्रतस्थे।

**तात्पर्यम्**

पारसविजयोत्तरं यथा सूर्यः स्वतीक्ष्णकिरणैः जलानि शोषयितुमुत्तरस्यां दिशि प्रसरति (उत्तरायणकाल इत्यर्थः) तथैव राजा रघुरपि उत्तरदेशस्थान् राज्ञः विजेतुं कौबेरीं (कुबेरसम्बन्धिनी दिशम्), उदीचीं दिशं प्रति प्रस्थितवान् (प्रचचाल)।

अथ उदीचीं दिशं प्रस्थितस्य रघोः सेनासम्बन्धिनोऽश्वान् वर्णयन्नाह-

**विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।**

**दुधुवुर्वाजिनः स्कन्धांल्लग्नकुङ्कुमकेसरान् ॥ ४-६७॥**

**पदच्छेदः**

विनीता-ध्वश्रमा-स्तस्य सिन्धु-तीर-विचेष्टनैः दुधुवु-र्वाजिनः ,स्कन्धां-ल्लग्न-कुङ्कुम-केसरान् ।

**अन्वयः**

सिन्धु-तीर-विचेष्टनैः विनीता-ध्वश्रमाः तस्य वाजिनःलग्न-कुङ्कुम-केसरान् स्कन्धान् दुधुवुः।

**तात्पर्यम्**

सिन्धुनद्याः तीरे अङ्कपरिवर्तनेन(sleeping to the side and stretching) मार्गस्य खेदं दूरीकृत्य रघोः सेनाश्वाः कुङ्कुम-केसर-संसक्तिमतः स्कन्धान् कम्पयन्ति स्म। धूञ् कम्पने।

अथ रघुर्हूणान् युधि जितवानित्याह-

**तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।**
**कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ४-६८॥**

**पदच्छेदः**

तत्र, हूणा-वरोधानाम्, भर्तृषु, व्यक्त-विक्रमम् , कपोल-पाटलादेशि, बभूव, रघु-चेष्टितम् ।

**अन्वयः**

तत्र भर्तृषु व्यक्त-विक्रमं रघु-चेष्टितं हूणा-वरोधानां कपोल-पाटलादेशि बभूव।

**तात्पर्यम्**

राजा रघुः तत्र उदीच्यां दिशि हूणान्तःपुरस्त्रीणां स्वामिनः मारयित्वा स्वीयं पराक्रमं विस्तारयन् तासां कपोलप्रदेशान् ताडनादिकृत-आरुण्यांश्चकार (कपोलपाटलादेशि)।शोक विलापे वक्षः कपोलौ च ताडयन्ति तत्रत्या: स्त्रियः ।

**बोधप्रश्नाः**

1. बभूवुः इत्यत्र कः लकारः?
2. कपोल इति पदस्य अर्थः कः?
3. रघुवंशमहाकाव्यस्य चतुर्थसर्गस्य कति श्लोकाः सन्ति

## शब्दावली

इभः,कपोलः,विक्रमः,अन्वयः,सर्गः इत्यादयः।

## सारांशः

1. महाकाव्यशैलीज्ञानं छात्राः जातम्।
2. रघोः गुणानां ज्ञानं छात्राः संप्राप्ताः।
3. छात्राणां कालिदासस्य काव्यशैलीज्ञानमभूत्।
4. नूतनानां शब्दानां ज्ञानं जातम्।
5. वाक्यरचनाकौशलं संपादितम्।
6. पुराणेतिहासस्य ज्ञानमभूत्।

## अभ्यासप्रश्नाः

1. निर्धारितपाठ्यभागस्य साराशं लिखत।
2. राजा रघोः चरितं वर्णयत।

## संदर्भग्रन्थसूची

1. रघुवंशमहाकाव्यम् चौखम्भा वाराणसी

## सहायकग्रन्थसूची

1. रघुवंशमहाकाव्यम् सुबोधिन्याख्यया व्याख्यया सरलार्थया प्राकृतभाषया संक्षिप्तार्थया संखलितम् काशीस्य-शारदा-भवनात्-समुल्लसितम्-१९८६

## पञ्चमः खण्डः – रघोः उत्तरदिग्यात्रा

पाठरचना –

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
    1. मूलश्लोकः
    2. पदच्छेदः
    3. अन्वयः
    4. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

**प्रस्तावना –**

रघोः राज्याभिषेकवर्णनपरे अस्मिन् सर्गे रघोः विजययात्रायाः वर्णनं क्रियते महाकविना कालिदासेन । एवं प्रसंगे प्राप्ते इदानीं रघोः उत्तरदेशयात्रायाः वर्णनमारब्धम्। तस्यां दिशि प्रथमतः हूणाधिपेन सह रघोः यः समरः समभूत् तद्वर्णनं अत्यन्तं चमत्कारेन कृतम् । ततः परं ६९ श्लोके काम्बोजदेशाधिपमपि जितवानिति ऊचुः कालिदासः । रघुनापराजिताः कांबोजाः अश्वधनाधिकं उपायनं ददुः । ततः परं हिमालयपर्वतारोनस्य वर्णनं अकार्षुः तत्रैव विद्यमानानां सिम्हानां वर्णनं, ततः गंगास्त्रोतस्य वर्णनं इत्यादिकं विस्तरेण विवृतम्। हिमालयस्थेन किरातेन सह रघोः यत् घोरं युद्धं अभूत् तस्य वर्णनं कृत्वा जयिनः रघोः यशोगानं किन्नराः चक्रुः इति साधितम् । हिमालयविजयानन्तरं कामरूपदेशस्य वर्णनं तद्राज्याधिपतेः पराजयः, तदीय गजोपायनं सम्यक् विवृत्य अन्ते सर्वदेशविजययात्रासमाप्ते सति रघोः विश्वजिद्यज्ञस्य वर्णनं कृत्वा सर्गं समापितवान् ।

**उद्देश्यम् –**

1. उत्तरदेशे विद्यमनानां राज्यानां स्वरूपं , स्थितिश्च कथमासीदिति ज्ञातुं शक्यते ।
2. कम्बोजदेशस्य महत्वं तत्र अश्वाधिक्यं आसीत् इति च अवगन्तुं शक्यते ।
3. हिमालये के प्राणिनः आसन्निति ज्ञातुं शक्यते ।
4. हिमालये विद्यमनानां किरतानां म्लेछजातीयानां स्थितिः अवगन्तुम् शक्यते ।
5. कामरूपदेशः ऐश्वर्यसम्पन्नः आसीत् कालिदाससमये इति तत्देश चारित्रं बुद्यते।
6. बहुत्र श्लोकेषु लिट् लकारस्य प्रयोगदर्शनात् तल्लकार प्रयोगे सामर्थ्यं वर्धते ।
7. विविधसमासानां स्वरूपं कथं प्रयोक्तव्यः इति च ज्ञातुं शक्यते ।
8. विविध धातूनां प्रयोगः साधयितुं शक्यते ।

अथ रघुः कम्बोजदेशवासिनो राज्ञोऽपि विजितवानित्याह-

**काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।**

**गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ४-६९॥**

**पदच्छेदः**

काम्बोजाः, समरे, सोढुम्, तस्य, वीर्यम्,अनीश्वराः, गजालान-परिक्लिष्टैः अक्षोटैः, सार्धम्, आनताः ।

**अन्वयः**

काम्बोजाः समरे तस्य वीर्यं सोढुं अनीश्वराः गजालान-परिक्लिष्टैःअक्षोटैः सार्धम् आनताः।

**तात्पर्यम्**

कम्बोजाधिपाः युद्धे रघोः प्रतापमसहमानाः सन्तः गजानाम्बन्धनेन नम्रैः अक्षोटवृक्षैः सहैव नम्राः जाताः । तथा च तेषां पराजयः जातः इति व्यङ्ग्येन सूचितं भवति ।

अथ रघवे कम्बोजाः पराजिताः सन्तोऽश्च धनादिकमुपायनं ददुरित्याह-

**तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।**

**उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ४-७०॥**

**पदच्छेदः**

तेषाम्, सदश्व-भूयिष्ठा-स्तुङ्गाः, द्रविण-राशयः,उपदाः, विविशुः, शश्वत् ,न, उत्सेकाः, कोसलेश्वरम्।

**अन्वयः**

तेषां सदश्व-भूयिष्ठाः तुङ्गाः द्रविण-राशयः उपदाः कोसलेश्वरः , शश्वत् विविशुः उत्सेकाः नविविशुः।

**तात्पर्यम्**

रघुना पराजयं प्राप्तवन्तः ते भूपतयः असङ्ख्यान् हस्त्यश्वादीन् सुवर्णसमूहांश्च रघवे उपहाररूपेण समर्पितवन्तः । तत् स्वीकोपि रघोः अहङ्करः नैव उदभूत् । तथा च रगोः गर्वहीनत अनेन सूचिता ।

अथ कम्बोजविजयानन्तरं लघोः हिमालयपर्वतारोहणमाह-

**ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।**

**वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ४-७१ ॥**

**पदच्छेदः**

ततः,गौरीगुरुम्, शैलम्, आरुरोह, अश्व-साधनः,वर्धयन्,इव, तत्कूटान्, उद्धूतैः, धातु-रेणुभिः ।

**अन्वयः**

ततः अश्व-साधनः गौरीगुरुं शैलं उद्धूतैः धातु-रेणुभिः तत्कूटान् वर्धयन् इव आरुरोह।

**तात्पर्यम्**

काम्बोजविजयानन्तरं सः रघुः अश्वसेनायुक्तः रघुः उत्तरस्यां दिशि विद्यमानान् राज्ञः जेतुं हिमाचलम् आरुरोह । तथा अश्वखुरत्थापितैः धातुरेणुभिः हिमलयस्य शिखराणि वर्धितानि इव आभाति।

अथ हिमालयमारोहतो रघोः पथि गङ्गाऽम्बुकणोपेतः पवनोऽववावित्याह-

**शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।**

**गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ४-७२ ॥**

**पदच्छेदः**

शशंस, तुल्यसत्त्वानाम्, सैन्यघोषे, अपि, असंभ्रमम् ,गुहाशयानाम् ,सिंहानाम् ,परिवृत्य, अवलोकितम्

**अन्वयः**

तुल्यसत्त्वानां गुहाशयानां सिंहानां परिवृत्य अवलोकितं सैन्यघोषेअपि असंभ्रमं शशंस।

**तात्पर्यम्**

महाबलाः हिमलयगुहान्तर्वर्तिनः शयानः सिंहाः भयजनकं रघुसेनायाः कलकलं श्रुत्वाऽपि निर्भयाः सन्तः केवलं ग्रीवभङ्गेन एव अवलोकयन्तः स्वीयभयाभावं प्रदर्शयामासुः ।

अथ रघोः सैनिका मृगमदवासितशिलातलेषु मार्गश्रमापनयनार्थं निवासं चक्ररित्याह-

**भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।**

**गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ४-७३॥**

**पदच्छेदः**

भूर्जेषु, मर्मरीभूताः, कीचक-ध्वनि-हेतवः, गङ्गा-शीकरिणः, मार्गे ,मरुतः,तम्, सिषेविरे।

**अन्वयः**

भूर्जेषु मर्मरीभूताः कीचक-ध्वनि-हेतवः गङ्गा-शीकरिणः मरुतः मार्गे तं सिषेविरे।

**तात्पर्यम्**

पर्वते आरोहणसमये पथि शुष्कीभूतेषु भूर्जपत्रेषु कुर्वाणः वंशविवरेषु मधुररावम् उत्पादयन्तः, गंगाजलकणांश्च सञ्चारयन्तः शीतलाः वायवः रघोः अपनीतवन्तः।

अथ हिमवति रघोर्दीपकार्यं रात्रौ ज्योतिर्लताविशेषा एव कुर्वन्ति स्मेत्याह-

**विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।**

**दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ४-७४॥**

**पदच्छेदः**

विशश्रमुः,नमेरूणाम् ,छायासु,अध्यास्य ,सैनिकाः, दृषदो, वासितो-त्सङ्गाः, निषण्ण-मृग-नाभिभिः।

**अन्वयः**

सैनिकाः नमेरूणां छायासु निषण्ण-मृग-नाभिभिः वासितो-त्सङ्गाः दृषदः अध्यास्य विशश्रमुः।

**तात्पर्यम्**

रघोः सैनिकाः नागकेसरवृक्षाणां छायासु मृगनाभिभिः वासितानि पाषाणतलानि मार्गश्रमापरिहाराय अधिष्ठाय श्रममपनीतवन्तः ।

अथ रघोः सेनागजानामौन्नत्यं देवदारुस्कन्धवल्कलक्षतैः किराता जानन्ति स्मेत्याह-

**सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः।**

**आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ४-७५॥**

**पदच्छेदः**

सरला-सक्त-मातङ्ग-ग्रैवेय-स्फुरित-त्विषः,आसन्, ओषधयः, नेतुः,नक्तम्, अस्नेहदीपिकाः ।

**अन्वयः**

सरला-सक्त-मातङ्ग-ग्रैवेय-स्फुरित-त्विषः ओषधयः नक्तं नेतुः अस्नेहदीपिकाः आसन्।

**तात्पर्यम्**

हिमालये रात्रौ देदीप्यमानाः वनौषधयः देवदारुवृक्षे बद्धाः ये गजाः तेषां कण्ठबन्धनेषु शृङ्खलादिषु परिस्फुरितकान्तयः सत्यः सैन्ययुक्तस्य रघोः तैलानिरपेक्षदीपाः अभूवन् ।

अथ रघोः पर्वतीयैर्म्लेच्छजातीयैः किरातादिभिः सह घोरं युद्धमभूदित्याह-

**तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।**

**गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ४-७६ ॥**

**पदच्छेदः**

तस्य, उत्सृष्ट-निवासेषु, कण्ठ-रज्जु-क्षत-त्वचः,गज-वर्ष्म, किरातेभ्यः, शशंसुः, देवदारवः।

**अन्वयः**

तस्य उत्सृष्ट-निवासेषु कण्ठ-रज्जु-क्षत-त्वचःदेवदारवः किरातेभ्यः गज-वर्ष्म शशंसुः।

**तात्पर्यम्**

रघुणा त्यक्तेषु प्रदेशेषु तस्य देवदारुवृक्षस्कन्धेषु गजशृङ्खलाघर्षचिह्नानि मतङ्गजानां देहौन्नत्यं प्रकाशनमकार्षुः।

अथ पर्वतीयगणविजयिनो रघोर्यशोगानं तत्र किन्नरगणाश्चक्रुरित्याह-

**तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।**

**नाराच-क्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥ ४-७७॥**

**पदच्छेदः**

तत्र, जन्यम्, रघोः, घोरम्, पर्वतीयैः,गणैः, अभूत् ,नाराच-क्षेपणीया-श्म-निष्पेषो-त्पतिता-नलम्

**अन्वयः**

तत्र रघोः पर्वतीयैः गणैः नाराच-क्षेपणीया-श्म-निष्पेषो-त्पतिता-नलम्घोरं जन्यं अभूत्।

**तात्पर्यम्**

हिमालयपर्वते रघोः किरातैः सह घोरं युद्धं बभूव। रघुणाक्षिप्ताः ये बाणाः तथा किरातैः निक्षिप्तानि यानि पाषाणानि तयोः अन्योन्य संघर्षणात् वह्नेः प्रादुर्भावः अभूत्।

अथ पराजितानां पर्वतीयगणानां रघवे उपहारस्वरूपमणिगणाद्यर्पणमाह-

**शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् ।**

**जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ४-७८॥**

**पदच्छेदः**

शरैः,उत्सव-संकेतान्, सः, कृत्वा, विरत-उत्सवान्,जय-उदाहरणम् ,बाह्वोः,गापयामास, किन्नरान्।

**अन्वयः**

सः शरैः उत्सव-संकेतान् विरत-उत्सवान् कृत्वा बाह्वोः जय-उदाहरणम्किन्नरान् गापयामास।

**तात्पर्यम्**

सः रघुः उत्सवसंकेतनाम्नां पर्वतवासिनां सविधे युद्धं कृत्वा तान् निरुत्सवान् कृतवान् । ततः विजयज्ञापनाय किन्नराः रघोः यशः सर्वतो जगुः।

अथ रघुरग्रे कैलासपर्वतमगत्वैव हिमालयशिखरादवततारेत्याह-

**परस्परेण विज्ञातस्तेषूपायनपाणिषु ।**

**राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ४-७९॥**

**पदच्छेदः**

परस्परेण, विज्ञातः, तेषु, उपायन-पाणिषु,राज्ञा, हिमवतः, सारः, राज्ञः, सारः, हिमाद्रिणा।

**अन्वयः**

तेषु उपायन-पाणिषु परस्परेण राज्ञा हिमवतः सारः हिमाद्रिणा(च) राज्ञः सारः विज्ञातः।

**तात्पर्यम्**

रघोः सकाशे उत्सवसंकेतनाम्नां पर्वतवासिनां पराजयानन्तरं हिमालयवासिनः तस्मै अनेकानि वस्तूनि उपहारीकृतवन्तः। तत्सर्वं दृष्ट्वा हिमालस्य धनबलं ज्ञातवान्। हिमालयोपि रघोः पराक्रमं ज्ञातवान्।

अथ कामरूपाधिपती रघोर्भयेन कम्पितवानित्याह-

**तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।**

**पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ४-८० ॥**

**पदच्छेदः**

तत्र, अक्षोभ्यम्, यशो-राशिम्, निवेश्य, अवरुरोह, सः,पौलस्त्य-तुलितस्य,अद्रेः,आदधानः, इव, ह्रियम्।

**अन्वयः**

सः तत्र अक्षोभ्यं यशो-राशिं निवेश्य पौलस्त्य-तुलितस्यअद्रेः ह्रियम् आदधानः इव अवरुरोह।

**तात्पर्यम्**

सः रघुः हिमालये अनितरं यशोराशिं संस्थाप्य कैलासमदृष्ट्वैव तस्य लज्जां उत्पादयन्निव ततः अवततार।

अथ कामरूपाधिपो रघो रथमार्गधूलिं दृष्ट्वैव भीतः सन् तेन सह युद्धं न कृतवानित्याह-

**चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ।**

**तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ४-८१ ॥**

**पदच्छेदः**

चकम्पे, तीर्ण-लौहित्ये, तस्मिन्, प्राग्ज्योतिषेश्वरः,तद्गजा-आलानताम्, प्राप्तैः, सह, कालागुरुद्रुमैः

**अन्वयः**

तस्मिन् तीर्ण-लौहित्ये (सति) प्राग्ज्योतिषेश्वरः तद्गजा-आलानतांप्राप्तैः कालागुरुद्रुमैः सह चकम्पे।

**तात्पर्यम्**

ततः रघुः लोहिताख्यां ब्रह्मपुत्रनदीं तीर्त्वा प्राग्ज्यौतिषनामकं कामरूपदेशं प्राप्तः। ततः कालागुरुवृक्षे बद्धानां रघोः गजानां शृङ्खलानाकर्षणघर्षणादिभिः यथा तरवः कम्पितवन्तः तथा कामदेशाधिपतिरपि चकम्पे।

अथ कामरूपाधिपो रघो रथमार्गधूलिं दृष्ट्वैव भीतः सन् तेन सह युद्धं न कृतवानित्याह -

**न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।**

**रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ४-८२॥**

**पदच्छेदः**

न, प्रसेहे, सः, रुद्धार्कम्, अ-धारावर्ष-दुर्दिनम् रथवर्त्म-रजः, अपि, अस्य, कुतः, ए ,पताकिनीम्।

**अन्वयः**

सः रुद्धार्कम् अ-धारावर्ष-दुर्दिनम् अस्य रथवर्त्म-रजः अपि न प्रसेहेपताकिनीं (तु) कुतः एव ।

**तात्पर्यम्**

सः कामदेशाधिपतिः सूर्यमण्डलस्य आवरणकारिणीं वृष्टिं विना दुर्दिवसं कुर्वतीं सेनाधूलिमपि दूरतः अपि द्रष्टुमसमर्थः अभूत्।

अथ कामरूपेश्वरो रघोः पादयोर्निपत्य रत्नान्युपायनीकृतवानित्याह-

**तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।**

**भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ४-८३॥**

**पदच्छेदः**

तम्, ईशः, कामरूपाणाम् अत्याखण्डल-विक्रमम् ,भेजे, भिन्न-कटैः,नागैः, अन्यान्, उपरुरोध, यैः।

**अन्वयः**

कामरूपाणां ईशः अत्याखण्डल-विक्रमं तं भिन्न-कटै: नागै:भेजे यैः अन्यान् उपरुरोध।

**तात्पर्यम्**

कामरूपाधिपःयैःमदोद्धतैःगजैःअन्यान्नृपान्निराचकारतानेवगजान्उपहारंकृत्वारघुंशरणमागतः।

अथ कामरुपेश्वरो रघोः पादयोर्निपत्य रत्नान्युपायनीकृतवानित्याह-

**कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।**

**रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ४-८४॥**

**पदच्छेदः**

कामरूपेश्वर:, तस्य, हेम-पीठ-अधिदेवताम्,रत्न-पुष्प-उपहारेण,छायाम्, आनर्च, पादयोः।

**अन्वयः**

कामरूपेश्वर: हेम-पीठ-अधिदेवतां तस्य पादयोः छायां  रत्न-पुष्प-उपहारेण आनर्च।

**तात्पर्यम्**

कामरूपाधिपःरत्नमयसिंह्मासनेपतितांपरमाराध्यांदेवतामिवरघुचरणकमलच्छायांरत्नपुष्पोहारेणपूजयामास।

अथ रघुः सर्वा दिशो जित्वा दिग्विजयन्निवृत्तोऽभूदित्याह-

**इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।**

**रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ४-८५॥**

**पदच्छेदः**

इति, जित्वा, दिश:, जिष्णु:, न्यवर्तत, रथोद्धतम्, रज:, विश्रामयन्, राज्ञां, छत्र-शून्येषु, मौलिषु।

**अन्वयः**

जिष्णुः इति दिशः जित्वा रथोद्धतं रजः मौलिषु विश्रामयन् न्यवर्तत।

**तात्पर्यम्**

एवं सर्वां दिशं जित्वा रघुः एकच्छत्राधिपतित्वं लब्ध्वा छत्ररहितानामन्येषां नृपानां किरीटेषु स्वसेनोत्थापितां धूलिं संक्रामयन् स्वराजधानीमाजगाम।

अथ रघुर्विश्वजितं यज्ञं कृतवानित्याह-

**स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।**

**आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ४-८६ ॥**

**पदच्छेदः**

सः विश्वजितम्, आजह्रे, यज्ञम्, सर्वस्व-दक्षिणम् , आदानम्, हि, विसर्गाय, सताम्, वारि-मुचाम् इव।

**अन्वयः**

सः सर्वस्व-दक्षिणं विश्वजितं आजह्रे, हि सतां वारि-मुचाम् इव आदानम् विसर्गाय( भवतीति शेषः)।

**तात्पर्यम्**

मेघानां समुद्रजलाहरणं तावत्यथा परोपकाराय तथा महात्मनामपि धार्जनं सतामुपकाराय इति द्योतनाय रघुः विश्वजिन्नामकं महायज्ञं कृत्वा सर्वस्वदक्षिणां ददौ।

अथ यज्ञान्ते स्वनिदेशायत्तीकृतेभ्यो नृपेभ्यो निजगृहगमनाय रघुराज्ञां ददातीत्याह-

**सत्रान्ते सचिवसखः पुरस्क्रियाभि-**

**गुर्वीभिः शमितपराजयव्यलीकान् ।**

**काकुत्स्थश्चिरविरहोत्सुकावरोधान्**

**राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ४-८७॥**

**पदच्छेदः**

सत्रान्ते, सचिव-सखः, पुरस्क्रियाभिः,गुर्वीभिः,शमित-पराजय-व्यलीकान्,काकुत्स्थः, चिर-विरह-उत्सुक-अवरोधान्,राजन्यान्,स्वपुर-निवृत्तये अनुमेने ।

**अन्वयः**

काकुत्स्थः सत्रान्ते सचिव-सखः (सन्) गुर्वीभिः पुरस्क्रियाभिःशमित-पराजय-व्यलीकान् चिर-विरह-उत्सुक-अवरोधान् राजन्यान्स्वपुर-निवृत्तये अनुमेने।

**तात्पर्यम्**

यज्ञान्तेमन्त्रिभिःसहितःरघुःपराजितानांनृपतीनांखेदंसम्मानादिनानिवारितवान्।चिरकालंविरहितान् च तान्नृपतीन्स्वदेशागमनायअनुजज्ञे।

अथ स्वपुरं प्रति गमनाय प्राप्तानुज्ञानां राज्ञां प्रयाणकाले रघोः पादयोः प्रणिपतनमाह-

**ते रेखाध्वजकुलिशातपत्रचिह्नं**

**सम्राजश्चरणयुगं प्रसादलभ्यम् ।**

**प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-**

**र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ४-८८॥**

**पदच्छेदः**

ते, रेखा-ध्वज-कुलिशातपत्र-चिह्नम्,सम्राजः,चरणयुगम्, प्रसादलभ्यम्,प्रस्थान-प्रणतिभिः, अङ्गुलीषु,चक्रुःमौलि-स्रक्- च्युत-मकरन्द-रेणु-गौरम्।

**अन्वयः**

ते रेखा-ध्वज-कुलिशातपत्र-चिह्नम् प्रसादलभ्यम्सम्राजः चरणयुगं प्रस्थान-प्रणतिभिः अङ्गुलीषु मौलि-स्रक्- च्युत-मकरन्द-रेणु-गौरम् चक्रुः।

**तात्पर्यम्**

प्रस्थानसमये सर्वे राजानः नमस्कारपूर्वकं रघोः चरणं प्रणेमुः, तदा तेषां मुकुटमाल्यगलितम्धुपरागः रघुचरणयुगलाङ्गुलीः अलंकारमकरोत्।

**सारांशः**

रघुःविजययात्रायाम्उत्तरस्यांदिशिसिन्धुनदीतीरेकिञ्चित्कालंस्थित्वाहूणान्रणेजित्वाकाम्बोजंजगाम। तेन सह युद्धे संप्राप्ते पराजिताः काम्बोजाधिपाः उपहाररूपेण स्वर्णान् उन्नतजातिविशिष्टाश्वांश्च ददुः। तत्स्वीकृत्य हिमालयं गतः। तद्गते च तत्रैव किञ्चित्कालं यावत् उषित्वा शीतलेन गंगाजलयुक्तवायुना श्रमपरिहारं कृत्वा तत्रैव विद्यमानान् किरातान् घोरे समरे जित्वा तैः दत्तोपहारादिभिः प्रीतः रघुः प्राचीदिशं ययौ। तत्र लोहिताख्यांब्रह्मपुत्रनदीं तीर्त्वा प्राग्ज्यौतिषाख्यं कामरूपदेशं प्राप्य तद्देशाधिपं जित्वा तद्दत्तगजाश्वाद्युपहारादिभिः संतुष्टः सन् स्वदेशं ययौ। स्वदेशे प्राप्ते सति एकच्छत्राधिपतित्वलाभाय विश्वजिद्यज्ञमकरोत्। तस्मिन् यज्ञे दक्षिणात्वेन सर्वस्वं ददौ। तदनन्तरं सर्वान् नृपतीन् स्वराज्यं प्रति गन्तुमादिष्टवान्।

**बोधप्रश्नाः**

1. रघुःगौरीगुरुं कथम् आरुरोह?
2. रघुणापराजिताः कम्बोजराजाः उपहाररूपेण किं दत्तवन्तः?
3. रघुः किमर्थं विश्वजिद्यज्ञं कृतवान्?
4. हिमालये कैः सह युद्धं कृतवान्रघुः?
5. हिमालयादवरोहणसमये किमदृष्ट्वैव अवततार रघुः?

**शब्दावली**

1. विशश्रमुः – विश्रामंस्वीकृतवान्
2. शशंस – शाशितवान्
3. नमेरुः – नागकेसरवृक्षः
4. गौरीगुरुः – हिमालयः
5. अक्षोभ्यम् – क्षोभरहितम्

**सन्दर्भग्रन्थाः**

1. रघुवंशम्, मोतीलालवनासीदास, 2004

**सहायकग्रन्थाः**

1. रघुवंशम्, सञ्जिविनीव्याख्यासहितम्, चौखाम्बापब्लिशर्स्, वाराणसी,2002
2. रघुवंशम्, सुबोधिनीव्याख्यासहितम्, शारदाभवनम्, वाराणसी,1929.

**बोधप्रश्नोत्तराणि**

1. अश्वसाधनःरघुःउद्धतैःधातुरेणुभिःतत्कूटान्वर्धयन्निवआरुरोह।
2. अश्वधनादिकमुपायनंददुः।
3. एकच्छत्राधिपतित्त्वलाभाय।

4. किरातैः।
5. कैलासम्।

**अभ्यासप्रश्नाः**

1. सर्वेश्लोकाःकण्ठस्थाःभवेयुः
2. रघोःहिमालयगमनवर्णनम्श्लोकैःपदच्छेदादिसहितैःकर्तव्यम्
3. श्लोकेविद्यमानानांविभिन्नधातूनांलट्-लिट्-लृट्-लङ्-लिङादिलकाररूपाणिलिखत